॥अथतर्कभाषाप्रारंभः॥पत्रें॥२९

MEMORIAL

न्यायस्यादिमं सूत्रं

॥श्रीगणेशायनमः॥ श्रीचक्रपाणयेनमः बालोपियोन्यायनयेप्रवेशमत्येनवांछुत्पलसः कृतेन संक्षिप्तयुक्त्यन्वितत्तर्कभाषाप्रकाश्यतेतॅकृतेमयैषा प्रमाण प्रमेय संशय प्रयोजन दृष्टां तसिद्धांतावयव तर्क निर्णय वाद जल्प वितंडा हेत्वाभास छल जाति निग्रहस्थाना नांतत्वज्ञानान्निःश्रेयसाधिगम इति अस्यायमर्थः प्रमाणादिषोडशपदार्थानांतत्वज्ञानान्मोक्ष प्राप्तिर्भवतिइति नचप्रमाणादीनांतत्वज्ञानं सम्यग्ज्ञानंतावद्भवतियावदेषामुद्देशलक्षण परीक्षानक्रियंते यदाहभाष्यकारः त्रिविधाचास्यशास्त्रस्यप्रवृत्तिः उद्देशोलक्षणंपरीक्षा चेति उद्देशस्तुनाममात्रेणैवस्तुसंकीर्तनं तत्रास्मिन्नेवसूत्रेकृतं लक्षणंत्वसाधारणधर्म वचनं यथागोः सास्नादिमत्त्वं यथालक्षितस्येतल्लक्षणमुपपद्यतेनवेतिविचारः परीक्षा तेनोद्देशलक्षणपरीक्षेप्रमाणादीनांतत्वज्ञानार्थेकर्त्तव्ये तत्रापिप्रथममुद्दिष्टस्येवप्रमाणस्य तावल्लक्षणमुच्यते प्रमाकरणंप्रमाणं अत्रचप्रमाणंलक्ष्यं प्रमाकरणंलक्षणं ननुप्रमायाःक रणंचेत्प्रमाणंतर्हितस्यफलंयत्कव्यंकरणस्यैवपरशोश्छिदेवफलं कापुनः प्रमा यस्याः कर णं प्रमाणमुच्यते यथार्थानुभवः प्रमा यथार्थपदेनसंशयविपर्ययतर्कज्ञानानांनिरासः

फलवत्वेनात्सत्यंप्रमैवफलंसाध्यमित्यर्थः यथाछिदाकरणस्य२

अनुभवस्मृतेर्निरासः अनुभवोनामस्मृतिव्यतिरिक्तंज्ञानं किंपुनः करणं साधकतमंकरणं अतिशयितंसाधकंसाधकतमं प्रकृष्टंकरणमित्यर्थः ननुसाधकंकारणमितिपर्यायः तदे वनज्ञायते किंकारणमिति उच्यते यस्यकार्यात्पूर्वभावोनियतोऽनन्यथासिद्धश्चतत्कारणं यथातंतुवेमादिकंपटस्य यद्यपिघटोत्पत्तौरासभादेर्द्वारागतस्यपूर्वभावोविद्यतेतथापिना सौनियतः नियमेनतंतुरूपस्यपूर्वभावोऽस्त्येव किंत्वन्यथासिद्धः पटरूपजननोपक्षीण त्वात् पटंप्रत्यपिकारणत्वेकल्पनागौरवात् तेनाऽनन्यथासिद्धनियतपूर्वभावित्वंकरणत्वं अ नन्यथासिद्धनियतपश्चाद्भावित्वंकार्यत्वं यत्तुकश्चिदाह कार्यानुगतान्वयव्यतिरेकिकारण मिति तदयुक्तं नित्यविभूनां व्योमादीनांकालतोदेशतश्चव्यतिरेकासंभवेनाकारणत्वप्र संगात् तच्चकारणंत्रिविधं समवाय्यसमवायिनिमित्तभेदात् तत्रयत्समवेतंकार्यमुत्पद्य तेतत्समवायिकारणंयथातंतवः पटस्यसमवायिकारणं तंतुष्वेवहिपटः समवेतोजायते नतुर्यादिषु ननुतंतुसंबंधस्तुर्यादिसंबंधोपिपटस्यविद्यतेतत्कथंनियततंतुष्वे वहिपटः समवेतोजायतेनतुर्यादिषु सत्यं द्विविधः संबंधः संयोगः समवायश्चे

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ति तत्रायुतसिद्धयोः संबंधः समवायः अन्ययोस्तु संबंधः संयोगएव कोपुनरयुतसिद्धौ यथा
यो र्मध्येएकमविनश्यदपराश्रितमेवावतिष्ठते तावायुतसिद्धौ तदुक्तं तावेवायुतसिद्धौवि
ज्ञातव्यौयथा द्वौ योः अनश्यदेकमपराश्रितमेवावतिष्ठते यथाऽवयवावयविनौ गुणगुणिनौक्रि
याक्रियावंतौजातिव्यक्ती विशेषनित्यद्रव्येचेति अवयव्यादयोहियथाक्रममवयवाद्याश्रि
ताएवावतिष्ठंते अविनश्यंतः विनश्यदवस्थास्वनाश्रिताअवयव्यादयोऽवतिष्ठंते यथा
तंतुनाशेसतिपटोनश्यति यथाआश्रयनाशेसतिगुणोनश्यति विनश्यत्तंतुविनाशकारण
सामग्रीसानिध्यं तंतुपटावप्यवयवावधिकृत्यनौतयोः संबंधः समवायएव अयुतसिद्धत्वा
त् तुरीपटयोस्तुनसमवायः अयुतसिद्धभावात् नहितुरीपटाश्रितेवावतिष्ठते नापिपट
स्तुर्याश्रितः अतस्तयोः संयोगएव तदेवंतंतुसमवेतः पटः जायते यत्समवेतंकार्यमुत्प
द्यतेतत्समवायिकारणं अतस्तंतुरेवसमवायिकारणंननुर्याद्रि पटश्चस्वगतरूपादेः स
मवायिकारणं एवंसतिनोपिघटस्यसमवायिकारणं घटश्चस्वगतरूपादेः ननुयदैवघटा
द्योजायंतेतदैवतद्गतरूपादयोपिजायंते ततः समानकालीनत्वाद्गुणगुणिनोः सव्येतरवि

षाणवत्कार्यकारणभावएवनास्ति पौर्वापर्याभावात् अतोरूपादीन्नतिनसमवायिकारणत्वं घ
टादीनांकारणविशेषत्वात्समवायिकारणस्य अत्रोच्यते नगुणगुणिनोः समानकालीनंजन्म किं
तुद्रव्यंनिर्गुणमेवप्रथमंसमुत्पद्यते पश्चात्तत्समवेतागुणरूपादयउत्पद्यंते समानकालो
त्पत्तौतुगुणगुणिनोःसमानसामग्रीकत्वात्भेदोनस्यात् कारणभेदनियतत्वात्कार्यभेदस्य त
स्मात्प्रथमेक्षणेनिर्गुणमेवद्रव्यंगुणेभ्यः पूर्वभावीतिभवतिगुणानांकारणम् तदाकारण
भेदोप्यस्ति घटोहि घटंप्रतिनकारणं एकस्यैवपौर्वापर्याभावात् नहिसएवतमेवप्रतिपूर्वभा
वीपश्चाद्भावीचस्वगुणान्प्रतितुपूर्वभावित्वाद्भवतिगुणानांकारणं नन्वेवंसतिप्रथमेक्षणे
घटोऽचाक्षुषःस्यात् अरूपिद्रव्यत्वात् वायुवत् तदेवहिद्रव्यंचाक्षुषंयन्महत्तेसतुद्भूतरूप
वत् अद्रव्यंचस्यात् गुणाश्रयत्वाभावात् गुणाश्रयोहिंद्रव्यमितिद्रव्यलक्षणं सेत्थं प्रथमेक्षणे
परमसूक्ष्मोयदि घटश्चक्षुषानगृह्यते तदाकानोहानिः स्यात्निश्चितंतेनव्यवस्थितमेवनि
र्गुणएवघटःप्रथममुत्पद्यते द्वितीयादिक्षणेषुचक्षुषागृह्यते नचप्रथमेक्षणेऽद्रव्यत्वाप
त्तिः समवायिकारणंद्रव्यमितिद्रव्यलक्षणयोगात् योग्यतयागुणाश्रयत्वान्न असमवायि

सति

कारणंतदुच्यते यत्समवायिकारणप्रत्यासन्नसमवधतसामर्थ्यंतदसमवायिकारणं यथा तंतुसंयोगः पटस्यासमवायिकारणं तंतुसंयोगस्यपटस्यसमवायिकारणेषुतंतुषुसमवेतत्वेसमवायिकारणप्रत्यासन्नत्वात् अन्येनेत्यादिहनियतपूर्वभावित्वेनपटंप्रतिकारणत्वाच्च एवंतंतुरूपंपटगतरूपस्यासमवायिकारणं ननुपटगतरूपस्यपटः समवायिकारणं तेनतद्गतस्येवकस्यचिद्धर्मस्यपटरूपंप्रत्यसमवायिकारणत्वमुचितं समवायिकारणप्रत्यासन्नत्वात् नतुतंतुगतरूपस्य तस्यसमवायिकारणप्रत्यासन्नत्वाभावात् मैवं तत्समवायिकारणसमवायिकारणप्रत्यासन्नस्यापिपरंपरयासमवायिकारणप्रत्यासन्नत्वात् निमित्तकारणंतदुच्यते यन्नसमवायिकारणंनाप्यसमवायिकारणं अथचकारणंतन्निमित्तकारणं यथावेमादिपटस्यनिमित्तकारणं तदेतद्वादानासेवत्रिविधंकारणं अभेदस्यतुनिमित्तमात्रं तस्यक्वचिदप्यसमवायात् समवायस्यचभावद्रव्यधर्मत्वात् तदेतेनव्यवस्थितमेतल्लक्षणंप्रमाकरणंप्रमाणमिति यत्त्वनधिगतार्थगंतृप्रमाणमितिप्रमाणलक्षणं तन्न एकस्मिन्नेवघटेघटोयंघटोयमितिधारावाहिकज्ञानानांगृहीत

तत्रहेतु पदरूप

राम ३

स्यत्रिविधकारणस्यमध्येयदेवकथमपिसातिशायंतदेवकरणमित्युक्तंते२

क्रियाक्रियातोविभागः विभागात्पूर्वसंयोगनाशात्तत्तुनरदे

ज्ञासंयोगो त्पत्तिः२

तद्धाहिणामप्रमाणप्रसंगात् नचान्यान्यक्षणलक्षविशिष्टार्थविषयीकरणादनधिगतार्थगंततेतिप्रत्यक्षेणसूक्ष्मकालभेदानाकलनात् मेरुग्रहेहिक्रियादिसंयोगांतानांचतुर्णांयौगपद्यासिमानोनस्यात् ननुप्रमायाःकारणानिबहूनिसंति प्रमातृप्रमेयादीनि तान्यपिकिंकरणानिउतनेति उच्यते सत्यपिप्रमातरिप्रमेयेचप्रमात्वत्पत्तेःइंद्रियसंयोगादेःसत्यविलंबेनप्रमोत्पत्तिः अतइंद्रियसंयोगादिरेवकरणं साधकतमत्वादिरोजेपिअन्येनेवोत्कर्षेणास्यप्रमात्रादिभ्योऽतिशायतत्वात् अतिशायितंसाधकंसाधकतमंतदेवकरणमित्युक्तं अतइंद्रियसंयोगादिरेवप्रमाकरणत्वात्प्रमाणं नप्रमात्रादीनि तानिचप्रमाणानिचत्वारि तथाचन्यायसूत्रं प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि किंपुनः प्रत्यक्षं साक्षात्कारिप्रमाकरणं प्रत्यक्षंसाक्षात्कारिणीप्रमासेवोच्यते येंद्रियजा सैचद्विविधा सविकल्पकनिर्विकल्पकभेदात् तस्याः करणंत्रिविधं कदाचिदिंद्रियं कदाचिदिंद्रियार्थसन्निकर्षः कदाचिज्ज्ञानं कदापुनरिंद्रियंकरणं यदानिर्विकल्पकरूपाप्रमाफलं तदाइंद्रियंकरणं तथाहि आत्मामनसासंयुज्यते मनइंद्रियेणइंद्रियमर्थेनइंद्रियाणांवस्तुप्राप्यकारित्वयेनिमाह॥

ततोऽर्थसन्निकृष्टेनेंद्रियेणनिर्विकल्पकंनामजात्यादियोजनाहीनंवस्तुमात्रावगाहिकिंचिदि
दमितिज्ञानंजन्यते तस्यज्ञानस्येंद्रियंकरणं छिदायाश्चपरस्यः इंद्रियार्थसन्निकर्षोऽवां
तरव्यापारः छिदाकरणस्यपरशोरिवदारुसंयोगः निर्विकल्पकंज्ञानंफलं परशोरिवछिदा
कदापुनरिंद्रियार्थसन्निकर्षः करणं यदानिर्विकल्पकानंतरंसविकल्पकंनामजात्यादियोजना
त्मकंडित्थोयंब्राह्मणोयंश्यामोयंदंडीतिविशेषणविशेष्यभावावगाहिज्ञानमुत्पद्यते तदेंद्रियार्थ
संनिकर्षः करणं निर्विकल्पकमेवअवांतरव्यापारः सविकल्पकंज्ञानंफलं कदापुनर्ज्ञानं
करणं यदोक्तसविकल्पकानंतरंहानोपादानोपेक्षाबुद्धयोजायंते तदानिर्विकल्पकंज्ञानंकरणं
सविकल्पकंज्ञानंअवांतरव्यापारः हानादिबुद्धयः फलं अत्रकश्चिदाह सविकल्पकादी
नामपींद्रियंकरणं यावंतित्वांतरालिकानिसंकेतेर्षोन्नितानिसर्वाएवांतरव्यापारः॥ राम
४
सत्यं सन्निकर्षादीनामवांतरव्यापारत्वेगौरवदोषप्रसंगः इंद्रियार्थयोस्तसंबंधः साक्षा
त्कारिप्रमाहेतुः सःषड्विधएव तद्यथा संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः
समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति तत्रयदाचक्षुषाघटविषयंज्ञानं

म

जन्यते तदाचक्षुरिंद्रियं घटोर्थः अनयोःसन्निकर्षः संयोगएव अयुतसिद्धभावात् एवंम
नसांतरिंद्रियेणयदात्मविषयंज्ञानंजन्यतेहमिति तदामनरिंद्रियं आत्मार्थः अनयोःसन्नि
कर्षः संयोगएव यदाचक्षुषाघटगतरूपादिकंगृह्यते घटेश्यामंरूपमस्तिइति तदाचक्षु
रिंद्रियं घटगतरूपंअर्थः अनयोःसन्निकर्षः संयुक्तसमवायएव चक्षुःसंयुक्तेघटेरू
पादेःसमवायात् एवंमनसात्मसमवेतेसुखादौगृह्यमाणेअयमेवसन्निकर्षः मनः संयु
क्तेआत्मनिसुखादेःसमवायात् घटगतपरिमाणादिग्रहणेचतुष्टयसन्निकर्षोधिकंकार
णमिष्यते सत्यपिसंयुक्तसमवायेतद्भावेदूरेपरिमाणाद्यग्रहणात् चतुष्टयसन्निक
र्षोयथाइंद्रियावयवेरर्थावयवानां इंद्रियावयविनाअर्थावयविनः इंद्रियावयविनाअ
र्थावयवानांअर्थावयविनाइंद्रियावयवानांसंयोग इतिकदापुनः संयुक्तसमवेतसम
वायःसन्निकर्षः यदापुनश्चक्षुषाघटगतरूपादिसमवेतरूपत्वादिसमान्यज्ञानंजन्यते तदाच
क्षुरिंद्रियं घटगतरूपादिसमवेतरूपत्वादिसामान्यमर्थः अनयोःसन्निकर्षः संयुक्तस
मवेतसमवायएव यतश्चक्षुःसंयुक्तेघटेरूपंसमवेतं तत्ररूपत्वादिसमवायात् कदा

म

पुनः समवायः सन्निकर्षः यदाश्रोत्रेंद्रियेणशब्दोगृह्यते तदाश्रोत्रंइंद्रियं शब्दोर्थः अनयोः सन्निकर्षः समवायएव श्रोत्रस्यचाकाशात्मकत्वात् कर्णशष्कुल्यवच्छिन्नेन ः श्रोत्रंशब्दस्यचाकाशगुणत्वात् गुणगुणिनोश्चसमवायात् कदापुनः समवेतसमवायः सन्निकर्षः यदापुनः शब्दसमवेतंशब्दत्वसामान्यंश्रोत्रेणगृह्यते तदाश्रोत्रमिंद्रियं शब्दत्वसामान्यमर्थः अनयोः सन्निकर्षः समवेतसमवायएव श्रोत्रसमवेतेशब्देशब्दत्वसमवायात् कदापुनर्विशेषणविशेष्यभावइंद्रियार्थसन्निकर्षः यदापुनश्चक्षुः संयुक्तेभूतलेघटाद्यभावोगृह्यते भूतलेघटोनास्तीति तदाचक्षुः संयुक्तस्यभूतलस्यघटाद्यभावोविशेषणंभूतलंविशेष्यं यदामनः संयुक्तेआत्मनिसुखाद्यभावोगृह्यते अहंसुखरहितइति तदामनःसंयुक्तस्यात्मनः सुखाद्यभावोविशेषणंआत्माविशेष्यः यदाश्रोत्रसमवेतेत्वगकारस्यघटाभावोविशेषणं तदेवं संक्षेपतः पंचविध संबंधान्यतमसंबद्धविशेषणविशेष्यभावलक्षणेनेंद्रियार्थसन्निकर्षेणाभावोगृह्यते एवंसमवायइति चक्षुःसंबद्धस्यतंतोर्विशेषणभूतः पटसमवायोगृह्यते इहतंतुषुपटसमवायोस्तीति तदेवंशोऽत्रसं

गकोरूपाभावोगृह्यतेतदाश्रोत्रसमवेतस्य ३

निकर्षोवर्णितः संग्रहश्च अक्षजाप्रमितिर्द्वेधाविकल्पानिर्विकल्पका करणंत्रिविधंतस्याः सन्निकर्षस्त्रिविधः १ ननुनिर्विकल्पकंपरमार्थतः सत्सलक्षणविषयंभवतुप्रत्यक्षंसविकल्पकंतुशब्दलिंगवदनुगताकारावगाहित्वात्सामान्यविषयंकथंप्रत्यक्षं अर्थजन्येवप्रत्यक्षत्वात् अर्थस्यतुपरमार्थतः सतस्तज्जनकत्वात् स्वलक्षणंतुपरमार्थसत् ननुसामान्यं तस्यप्रमाणनिरस्तविधिभावस्वान्यव्यावृत्तात्मनस्तुच्छत्वात् मैवं सामान्यस्यापिवस्तुभूतत्वात् तदेवंव्याख्यातंप्रत्यक्षं कोष्ठेगोधूमाःसंतिइत्यत्रशब्दलिंगेगोधूमज्ञानंप्रत्यक्षेणतद्वत्सविकल्पकंनप्रत्यक्षं लिंगपरामर्शीनुमानं येनह्यनुमीयतेतदनुमानं लिंगपरामर्शीनानुमीयते अतोलिंगपरामर्शीनुमानं तच्चधूमादिज्ञानं अनुमितंप्रतिकरणत्वात् अग्न्यादिज्ञानमनुमितिः तत्करणंहिधूमादिज्ञानं किंपुनर्लिंगं कश्चनस्यपरामर्शः उच्यते व्याप्तिविशेषणयुक्तस्यगमकंतत्तस्यलिंगं यथाधूमोग्नेर्लिंगं तथाहि यत्रधूमस्तत्राग्निरितिसहचर्यनियमोव्याप्तिः तस्यांगृहीतायामेवधूमोग्निंगमयति नत्वगृहीतायामपि अतोव्याप्तिविशेषणमनुमापकत्वाद्धूमोग्निलिंगं तस्यत्रतीयंज्ञानंपरामर्शः तथाहि प्रथमं

तावन्महानसादौभूयोभूयोधूमंपश्यन्नग्निंपश्यति तेनभूयोदर्शनेनधूमाग्न्योः स्वाभाविकं संबंधमवधारयति यत्रधूमस्तत्राग्निरिति यद्यपि यत्रयत्रमैत्रीतनयत्वंतत्रतत्रश्यामत्वमिति भूयोदर्शनंसमानं तथापिमैत्रीतनयत्वश्यामत्वयोर्नस्वाभाविकःसंबंधः किंतौपाधिकएव शाकाद्यन्नपरिणामस्योपाधेर्विद्यमानत्वात् तथाहि श्यामत्वेहिमैत्रीतनयत्वंनप्रयोजकं किंतुशाकाद्यन्नपरिणतिभेदएवप्रयोजकः प्रयोजकश्चोपाधिरित्युच्यते नवधूमाग्न्योःसंबंधेकश्चितउपाधिरस्ति अस्तिचेत्सयोग्योवाऽयोग्योवा अयोग्यस्यशंकितुमशक्यत्वात् योग्यस्यचानुपलभ्यमानत्वात् यत्रोपाधिस्तत्रोपलभ्यते यथाग्नेर्धूमसंबंधेआर्द्रधनसंयोगः हिंसात्वस्यचाधर्मेणसंबंधेनिषिद्धत्वमुपाधिः मैत्रीतनयत्वस्यश्यामत्वेनसंबंधेशाकाद्यन्नपरिणतिभेदः नचेहधूमस्याग्निसाहचर्यैकश्चिदुपाधिरस्ति यद्यभविष्यत्तदाभूतलमिवादृश्यत् ततोभूतलमिवदर्शनाभावान्नास्तीतितर्कसहकारिणाऽनुपलंभसनाथेनप्रत्यक्षेणैवोपाध्यभावोऽवधार्यते उपाध्यभावग्रहणजनितसंस्कारसद्भूतेनभूयोदर्शनजनितसंस्कारसद्भूतेनसाहचर्याग्रहणप्रत्यक्षेणैवधूमाग्न्योर्व्याप्तिरवधार्यते तेनधूमाग्न्योः

स्वाभाविकएवसंबंधोनत्वौपाधिकः स्वाभाविकसंबंधोव्याप्तिरित्युच्यते तेनधूमाग्न्योर्व्याप्तेर्गृह्यमाणायांमहानसेयद्धूमज्ञानंतत्प्रथमं पर्वतादौपक्षेयद्धूमज्ञानंतद्द्वितीयंततः पूर्वगृहीतांधूमाग्न्योर्व्याप्तिंस्मृत्वातत्रैवपर्वतेपुनर्धूमंपरामृशति अत्रत्यंपर्वतेऽग्निनाव्याप्तोधूमश्चेति तदिदंधूमज्ञानंतृतीयं एतच्चावश्यमभ्युपेतव्यंअन्यथायत्रधूमस्तत्राग्निरित्येवस्यात् इहतुकथमग्निनाभावितव्यं तस्मादिहापिधूमोस्तीतिविज्ञानमन्वेषितव्यं अयमेवलिंगपरामर्शः अनुमितिंप्रतिकरणत्वान्नानुमानं तस्मादत्रपर्वतेग्निरित्यनुमितिज्ञानमुच्यते ननुकथंप्रथमंमहानसेयद्धूमज्ञानंतन्नाग्न्यनुमापकं सत्यं व्याप्तेरगृहीतत्वात् गृहीतायामेवव्याप्तामनुमितिरुदयात् अथव्याप्तिनिश्चयोत्तरकालंमहानसएवाग्निरनुमीयतां मैवं अग्नेर्दृश्यत्वेनसंदेहाभावात् संदिग्धश्चानुमीयते यथोक्तंभाष्यकृता नानुपलब्धेननिर्णीतेचेन्न्यायः प्रवर्तते अपितुसंदिग्धेचेति अथपर्वतगतमात्रस्थपुंसोयद्धूमज्ञानंतत्कथंनाग्निमनुमापयति अस्तिचाग्निसंदेहः साधकबाधकप्रमाणाभावेनसंशयस्यन्यायप्राप्तत्वात् सत्यं अगृहीतव्याप्तेरिवगृहीतविस्मृतव्याप्तेरपिपुंसोनुमानानुदयेनव्याप्तिस्मृतेरप्यनुमितिंप्रतिहेतुत्वात् धूमादर्शनाच्चोद्बुद्धसंस्कारोव्याप्तिंस्मरति योयोधूमवान्ससोग्निमान् यथामहानसइ

ति तेनधूमदर्शनेयातेस्मृतौजातायांयद्धूमज्ञानंतत्तृतीयं वह्निव्याप्यधूमवान्पर्वतइति तदेवाग्नि
मनुमापयतिनान्यत् तदेवलिंगपरामर्शः तेनव्यवस्थितमेतल्लक्षणं लिंगपरामर्शोनुमान
मिति तच्चानुमानंद्विविधं स्वार्थंपरार्थंचेति स्वार्थंस्वप्रतिपत्तिहेतुः तथाहि स्वयमेवमहा
नसादौविशिष्टेनप्रत्यक्षेणधूमाग्न्योर्व्याप्तिंगृहीत्वापर्वतसमीपगतस्तद्वतेचाग्नेःसंदिहानः
पर्वतवर्त्तिनीमनवच्छिन्नमूलामभ्रंलिहांधूमरेखांपश्यन्धूमदर्शनाद्बोद्धुःसंस्कारोव्याप्तिं
स्मरति यत्रधूमस्तत्राग्निरिति ततोऽत्रापिधूमोस्तिइति तस्मादत्रपर्वतेवह्निरस्तीतिस्वय
मेवप्रतिपद्यते तत्स्वार्थानुमानं यत्तुस्वयंधूमादग्निमनुमायपरंबोधयितुंपंचावयवमनुमा
नवाक्यंप्रयुक्तेतत्परार्थानुमानं तद्यथा पर्वतोऽग्निमान्धूमान् धूमवत्वात् योयोधूमवा
न्ससोऽग्निमान् यथामहानसं तथाचायंधूमवान् तस्मात्तथेति अनेनवाक्येनप्रतिपादि
तात्पंचावयवोपपन्नात् लिंगात्परोप्यग्निंप्रतिपद्यते तेनैतत्परार्थानुमानं अत्रपर्वतस्याग्नि
मत्वंसाध्यं धूमवत्वंहेतुः सचान्वयव्यतिरेकी अन्वयेनव्यतिरेकेणचव्याप्तेर्विद्यमान
त्वात् तथाहि यत्रधूमस्तत्राग्निर्यथामहानसेइत्यन्वयव्याप्तिः महानसेधूमाग्न्योरन्व
यसद्भावदर्शनात् एवंयत्राग्निर्नास्तितत्रधूमोपिनास्ति यथामहाह्रदइतिव्यतिरेकव्याप्तिः।

महाह्रदेधूमाग्न्योर्व्यतिरेकसद्भावदर्शनात् व्यतिरेकव्याप्तेस्त्वयंक्रमः अन्वयव्याप्तेर्यद्व्याप्यं
तद्भावेत्रव्यापकः अन्वयव्याप्तेर्यत्तुपव्यकंतद्भावेत्रव्याप्यइति तदुक्तं व्याप्यव्याप
कभावोहि भावयोर्यादृगिष्यते तयोरभावयोस्तत्साद्दृपरीतः प्रतीयते अन्वये साधनंव्या
प्यं साध्यंव्यापकमुच्यते साध्याभावेप्यथाव्याप्योव्यापकः साधनात्क्रमः व्याप्यस्यवचनं
पूर्वं व्यापकस्यततः परं एवंपरीक्षिताव्याप्तिः स्फुटीभवतितत्वतः तदेवंधूमवत्वंहेतोरन्व
येनव्यतिरेकेणचव्याप्तिरस्ति यत्तुवाक्येकेवलमन्वयव्याप्तिरेवप्रदर्श्यते तदेकेनापिचरिता
र्थत्वात् तत्राप्यन्वयस्यावक्रत्वात्प्रदर्शनं सरलमार्गेणसिध्यतोर्थस्यवक्रेणसाधनायोगात्॥
नतुव्यतिरेकव्याप्तेरभावात् तदेवंधूमवत्वंहेतुः अन्वयव्यतिरेकी एवंअन्येपिअनित्यत्वा
दौसाध्येकृतकत्वादयोहेतवोअन्वयव्यतिरेकिणोद्रष्टव्याः कश्चिद्धेतुः केवलव्यतिरेकी॥
तद्यथा सात्मकत्वेसाध्येप्राणादिमत्वंहेतुः यथाजीवच्छरीरंसात्मकंप्राणादिमत्वात् य
त्सात्मकंनतत्प्राणादिमन्नदृष्टं यथाघटः नचेदंजीवच्छरीरंतथा तस्मात्तथेति अत्र
हिजीवच्छरीरस्यसात्मकत्वंसाध्यं प्राणादिमत्वंहेतुः सचकेवलव्यतिरेकी अन्वयव्याप्तेर्
भावात् तथाहि यत्प्राणादिमत्तत्सात्मकंयथा अमुकइतिदृष्टांतोनास्ति जीवच्छरीरं

सर्वपक्षएव लक्षणमपिकेवलव्यतिरेकीहेतुः यथापृथिवीलक्षणंगंधवत्त्वंविवादास्पदंपृथिवीगंधवत्वात्यन्नपृथिवीतन्नगंधवत् यथाजलंप्रमाणलक्षणंयथाप्रमाकरणत्वं तथाहि प्रत्यक्षादिप्रमाणमितिव्यवहर्तव्यं प्रमकरणत्वात् यत्प्रमाणमितिनव्यवहीयतेन तत्प्रमाणंकरणंयथाप्रत्यक्षादि पुनरत्रयत्प्रमाकरणंतत्प्रमाणमितिव्यवहर्तव्यं यथाअमुकृतिरदृष्टांतोनास्ति प्रमाणमात्रस्यपक्षीकृतत्वात् अत्रव्यवहारः साध्योनतुप्रमाणत्वं तस्यप्रमाकरणत्वाद्धेतोरभेदेनसाध्याभेदहोषप्रसंगात्ततदेवंकेवलव्यतिरेकिणोदर्शितः कश्चिद्धेतुः केवलान्वयी यथाविरोधोभिधेयः प्रमेयत्वात् यत्प्रमेयंतदभिधेयं यथाघटः तथाचायंतस्मात्तथेति अत्रविरोधस्याभिधेयत्वंसाध्यंप्रमेयत्वंहेतुः सचकेवलान्वयीव यदभिधेयंनभवति तत्प्रमेयमपिनभवति यथाअमुकृतिव्यतिरेकदृष्टांतोनास्ति सर्वत्रप्रामाणिकएवायोदृष्टांतः सचप्रमेयत्वाभिधेयत्वं एतेषांचान्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिहेतूनात्रयाणांमध्येयोहेतुरन्वयव्यतिरेकेसपंचरूपोपन्नएवस्वसाध्यंसाधयितुंक्षमते नत्वेकेनापिरूपेणहीनः तानिरूपाणिपंच यक्षधर्मत्वंसपक्षेसत्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वंचेति एतानिपंचरूपाणिधूमत्वेहेतौ

BHANDARKAR ORIENTAL RESEARCH INSTITUTE MEMORIAL

विद्यते अतोधूमवत्त्वंहेतुरन्वयव्यतिरेकी तथाहि धूमवत्त्वंपक्षस्यपर्वतस्यधर्मः पर्वतेतस्यविद्यमानत्वात् एवंसपक्षेसत्वं सपक्षेमहानसादौविद्यतइत्यर्थः एवंविवक्षान्महदाद्यावृत्ति तत्रनास्तीत्यर्थः एवंअबाधितविषयंधूमवत्त्वं तथाहि धूमवत्त्वस्यहेतोर्विषयः साध्योधर्मः तत्राग्निमत्वं तत्केनापिप्रमाणेननबाधितंनखंडितमित्यर्थः एवमसत्प्रतिपक्षो यस्यतरसत्प्रतिपक्षंधूमवत्त्वं तथाहि साध्यविपरीतसाधकत्वंहेत्वंतरंप्रतिपक्षइत्युच्यते स चधूमवत्त्वहेतोर्नास्त्येव अनुपलंभात् एवंधूमत्वहेतौपंचरूपाणिविद्यंते तेनेतद्धूमवत्त्वस्यसाधकं अग्नेःपक्षधर्मत्वंहेतोःपक्षधर्मताबलात्सिद्ध्यति तथाहि अनुमानस्यहेअंगे व्याप्तिःपक्षधर्मताच तत्रव्याप्त्यासाध्यसामान्यसिद्धिः पक्षधर्मतावलात्साध्यस्यपक्षसंबंधित्वंविशेषःसिध्यति पक्षधर्मेणधूमवत्त्वेनवह्निरपिपर्वतसंबद्धएवानुमीयते अन्यथासामान्यस्यव्याप्तिग्राहकादेवसिद्धेः कृतमनुमानेन यस्त्वन्वयव्यतिरेकीहेतुः ससर्वैःपंचरूपोपपन्नएवसद्धेतुः अन्यथाहेत्वाभासोहेतुरितियावत् केवलान्वयीचतद्रूपोपपन्नएवस्वसाध्यंसाधयति तस्यहिकेवलान्वयितोविपक्षाद्व्यावृत्तिर्नास्ति विपक्षाभावात् केवलव्यतिरेकीचतद्रूपोपपन्नएवस्वसाध्यंसाधयति तस्यसपक्षे

सत्वेनास्ति सपक्षाभावात्केचुनः पक्षसपक्षविपक्षाः उच्यंते संदिग्धसाध्यधर्मीधर्मीपक्षः यथा धूमानेपर्वतः सपक्षस्तुनिश्चितसाध्यधर्मीधर्मी यथातत्रैवमहानसं विपक्षस्तुनिश्चितसाध्याभाववान् यथातत्रैवमहाह्रदः तदेवमन्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिणोहेतवोदर्शिताः अतोन्येहेत्वाभासाः तेचासिद्धविरुद्धानैकांतिकप्रकरणसमकालात्ययापदिष्टभेदात्पंचैव तत्रेनिश्चितपक्षवृत्तिरसिद्धः तत्रासिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति आश्रयासिद्धोयथा गगनारविंदंसुरभि अरविंदत्वात् सरोजारविंदवत् अत्रगगनारविंदंआश्रयः सतुनास्त्येव स्वरूपासिद्धोयथा शब्दोनित्यः चाक्षुषत्वात्घटवत् अत्रचाक्षुषत्वंहेतुः सतुशब्देनास्त्येव शब्दस्यश्रावणत्वात् व्याप्यत्वसिद्धस्तुद्विविधः एकोव्याप्तिग्राहकप्रमाणाभावात् अपरस्तूपाधिसद्भावात् तत्रप्रथमोयथा यत्सत्तत्क्षणिकं॥यथाघनःशंखश्चादिः नचसत्वक्षणिकयोर्व्याप्तिग्राहकंकिंचित्प्रमाणमस्ति सोपाधिकतयाव्याप्यत्वात्सिद्धोऽप्युच्यमानोयंक्षणिकत्वमन्यप्रयुक्तमभ्युपगतंस्यात् द्वितीयोयथा क्रतवेतंदहिंसाधेअर्थसाधनंहिंसात्वात् क्रतुबाह्यहिंसावत् अत्राधर्मसाधनत्वेहिंसात्वंनप्रयोजकं किंतुनिषिद्धत्वमेवप्रयोजकंप्र

राम १

योजकस्योपाधिरितियावत् तथाहि साध्यव्यापकत्वेसतिसाधनाव्यापकउपाधिरित्युपाधिलक्षणं तत्रनिषिद्धत्वेऽस्ति निषिद्धत्वंअधर्मस्यव्याप्यं यतोयत्रयत्रअधर्मसाधनत्वंतत्रतत्रावश्यंनिषिद्धत्वं एवंसाधनंहिंसात्वंनव्याप्नोतिनिषिद्धता नहियत्रयत्रहिंसात्वंतत्रतत्रावश्यंनिषिद्धत्वं यागीयहिंसायांनिषिद्धत्वाभावात् तदेवंनिषिद्धत्वस्योपाधेःसद्भावात् अन्यप्रयुक्तव्याप्युपजीविहिंसात्वंव्याप्यत्वासिद्धमेव सध्यविपर्ययव्याप्तरूपविरुद्धः सयथा शब्दोनित्यः कृतकत्वात् आकाशवत् कृतकत्वंहिसाध्यनित्यविपरीतानित्यत्वेनव्याप्तं यत्कृतकंतदनित्यमेव अतोविरुद्धंकृतकत्वमिति सव्यभिचारोनैकांतिकः सद्विधः साधारणानैकांतिकोसाधारणानैकांतिकश्चेति तत्रपक्षसपक्षविपक्षवृत्तिः साधारणानैकांतिकः सयथाशब्दोनित्यः प्रमेयत्वात्व्योमवत् अत्रप्रमेयत्वंहेतुः सतुनित्यानित्यवृत्तिः सपक्षविपक्षाभ्यांव्यावृत्तोयः पक्षेवर्त्ततेसोऽसाधारणानैकांतिकः सयथा नित्यापृथ्वीगंधवत्त्वात् गंधवत्त्वंहिसपक्षानित्याद्विपक्षाच्चानित्याद्व्यावृत्तं किंतुपृथ्वीत्वप्रकरणसमस्तुसएव यस्यहेतोः साध्यविपरीतसाधकंहेत्वंतरंविद्यते यथाशब्दोनित्योनित्यधर्मरहितत्वात् इतिशब्दोनित्यनित्यधर्मरहितत्वात् अयमेवसत्प्रतिपक्षउच्य

सत्वंनास्ति सपक्षाभावात्केपुनः पक्षसपक्षविपक्षाः उच्यंते संदिग्धसाध्यधर्मीधर्मीपक्षः यथा धूमानेपर्वतः सपक्षस्तुनिश्चितसाध्यधर्मीधर्म्मी यथातत्रैवधूमानेमहानसं विपक्षस्तुनिश्चितसाध्याभाववान् यथातत्रैवमहाह्रदः तदेवमन्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिणोहेतवोदर्शिताः अतोन्येहेत्वाभासाः तेचासिद्धविरुद्धानैकांतिकप्रकरणसमकालात्ययापदिष्टभेदात्पंचैव तत्रनिश्चितपक्षवृत्तिरसिद्धः तत्रासिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति आश्रयासिद्धोयथा गगनारविंदंसुरभि अरविंदत्वात् सरोजारविंदवत् अत्रगगनारविंदंआश्रयः सतुनास्त्येव स्वरूपासिद्धोयथा शब्दोनित्यः चाक्षुषत्वात्घटवत् अत्रचाक्षुषत्वंहेतुः सतुशब्देनास्त्येव शब्दस्यश्रावणत्वात् व्याप्यत्वसिद्धस्तुत्रिविधः एकोव्याप्याहकप्रमाणाभावात् अपरस्तूपाधिसद्भावात् तत्रप्रथमोयथा यत्सत्तत्क्षणिकं॥यथाघनःशंखशब्दादिः नचसत्वंक्षणिकयोर्व्याप्याहकंकिंचित्प्रमाणमस्ति सोपाधिकतयाव्याप्यत्वासिद्धोऽभ्युपगम्यमानायांक्षणिकत्वमन्यप्रयुक्तमभ्युपगतंस्यात् द्वितीयोयथा क्रतंतर्व्हिंसाधेअधर्मसाधनंहिंसात्वात् क्रतुवाहिंसावत् अत्राधर्मसाधनत्वेहिंसात्वंनप्रयोजकं किंतुनिषिद्धत्वमेवप्रयोजकंप्र

योजकश्चोपाधिरितियावत् तथाहि साध्यव्यापकत्वेसतिसाधनाव्यापकउपाधिरित्युपाधिलक्षणं तत्रनिषिद्धत्वेऽस्ति निषिद्धत्वंअधर्मस्यव्याप्यं यतोयत्रयत्रअधर्मसाधनत्वंतत्रतत्रावश्यंनिषिद्धत्वं एवंसाधनंहिंसात्वंनव्याप्नोतिनिषिद्धता नहियत्रयत्रहिंसात्वंतत्रतत्रावश्यंनिषिद्धत्वं यागीयहिंसायांनिषिद्धत्वाभावात् तस्मादेवंनिषिद्धत्वेस्योपाधेःसद्भावात् अन्यप्रयुक्तव्याप्युपजीविहिंसात्वंव्याप्यत्वासिद्धमेव सध्यविपर्ययव्याप्तस्तुविरुद्धः सयथा शब्दोनित्यः कृतकत्वात् आकाशवत् कृतकत्वंहिसाध्यनित्यविपरीतानित्यत्वेनव्याप्तं यत्कृतकंतदनित्यमेव अतोविरुद्धंकृतकत्वमिति सव्यभिचारोनैकांतिकः सद्विधः साधारणानैकांतिकोसाधारणानैकांतिकश्चेति तत्रपक्षसपक्षविपक्षवृत्तिः साधारणानैकांतिकः सयथाशब्दोनित्यः प्रमेयत्वात्व्योमवत् अत्रप्रमेयत्वंहेतुः सतुनित्यानित्यवृत्तिः सपक्षविपक्षाभ्यांव्यावृत्तोयः पक्षेवर्त्ततेसोऽसाधारणानैकांतिकः सयथा नित्याभूर्गंधवत्त्वात् गंधवत्त्वंहिसपक्षान्नित्यादप्पक्षाच्चानित्याद्व्यावृत्तं किंतुभूमात्रवृत्तिप्रकरणसमस्तुसएव यस्माद्धेतोः साध्यविपरीतसाधकंहेत्वंतरंविद्यते यथाशब्दोनित्योनित्यधर्मरहितत्वात् इतिशब्दोनित्यनित्यधर्मरहितत्वात् अयमेवसत्प्रतिपक्षउच्य

ते पक्षेप्रमाणांतरावधृतसाध्याभावो हेतुर्बाधितविषयः कालात्ययापदिष्ट इत्युच्यते यथा अग्निरनुष्ण कृतकत्वाद्जलवत् अत्रहि कृतकत्वस्यहेतोः साध्यमनुष्णत्वं तदभावःप्रत्यक्षेणैवावधारितः स्पार्शनप्रत्यक्षेणैवावधारितः स्पार्शनप्रत्यक्षेणोष्णत्वोपलंभात् व्याख्यातमनुमानं इत्यनुमानंप्रमाणं अतिदेशवाक्यार्थस्मरणसहकृतगोसादृश्यविशिष्टपिंडज्ञानंउपमानं तथाहि यथागवयमजानन्पिंडयागोस्तथागवयइतिकुतश्चिदारण्यकपुरुषाद्युत्पन्नसंज्ञोवाक्यार्थंस्मरन्यदागोसादृश्यविशिष्टपिंडंपश्यति तदातद्वाक्यार्थस्मरणसहकृतगोसादृश्यविशिष्टपिंडज्ञानंउपमानं उपमितिंप्रतिकरणत्वात् गोसादृश्यविशिष्टपिंडदर्शनानंतरंअसौगवयशब्दवाच्यः पिंडइति संज्ञासंज्ञिसंबंधप्रतीतिरुपमितः सेवफलं इयंतुप्रत्यक्षानुमानाभ्यत्वात् प्रमाणांतरमुपमानाख्यमाह्यिपति इत्युपमानं आप्तवाक्यंशब्दः आप्तस्तुयथाभूतार्थस्योपदेष्टापुरुषः वाक्यंतु आकांक्षायोग्यतासंनिधिमतांपदानांसमूहः अतएवगौरश्वःपुरुषोहस्तीतिपदानिन वाक्यं परस्पराकांक्षाविरहात् अग्निनासिंचेदितिनवाक्यं योग्यताविरहात् नह्यग्निसेकयोः परस्परयोन्वययोग्यतास्ति तथाहि अग्निनेतितृतीययासेकरूपंकार्यंप्रतिक

रणत्वंअग्नेः प्रतिपादितं नचाग्निःसेककरणीभवितुंयोग्यः तेनकार्यकारणभावलक्षणसंबंधेऽग्निसेकयोरयोग्यत्वात् अग्निनासिंचेदितिनावाक्यं एवमेकैकशः प्रहरेप्रहरेअसहोच्चारितानिगामानयेत्यादिपदानिनवाक्यं सत्यामपिपरस्पराकांक्षायांसत्यामपिपरस्परान्वयेयोग्यतायांपरस्परसान्निध्याभावात् यानितुआकांक्षाणियोग्यानिसंनिधिमंतितानिपदान्येववाक्यं यथा ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादि अथवादीतीरेपंचफलानिसंति यथा वातान्येवगामानयेत्यादिपदानिअविलंबेनोच्चारितानि ननु नह्यत्रापिपदानिसाकांक्षाणिकिलयाःपलाद्यानामाधेयानांतीरद्याधाराकांक्षित्वात् नचविचार्यमाणेऽर्थेऽपिसाकांक्षाः आकांक्षायाःज्ञानात्मकत्वेनचेतनधर्मत्वात् सत्यं अर्थोस्तावत्स्वयंश्रोतुरन्योन्यविषयाकांक्षाजनकत्वेनसाकांक्षइत्युपचर्यतेवह्वारेणतत्प्रतिपादकानिपदान्यपिसाकांक्षीत्युपचर्यते यद्वापदान्येवार्थंप्रतिपाद्यार्थांतरविषयाकांक्षाजनकत्वेनोपचारात्तानिसाकांक्षाणि एवमर्थाःसाकांक्षाः परस्परान्वययोग्याश्च तद्द्वारेणपदान्यपियोग्यानीत्युपचर्यंते संनिहितत्वंतु पदानामेकेनैवपुंसाविलंबेनोच्चारितत्वं तच्चसाक्षादेवपदेष्वसंभवति नार्थद्वारा तेनायमर्थः संपन्नः अर्थप्रतिपादनद्वाराश्रोतुःपदांतरवि

षयामर्थांतरविषयांवाआकांक्षांजनयतांप्रतीयमानपरस्परान्वययोग्यार्थप्रतिपादकानां
सन्निहतानांपदानांसमूहोवाक्यं पदंचवर्णसमूहः समूहश्चात्रएकज्ञानविषयीभावः त
त्रवर्णानांक्रमवतामाशुतरविनाशित्वेनएकदानेकवर्णानुभवासंभवात् पूर्वपूर्ववर्णान
नुभूयांत्यवर्णंप्रतिपूर्वपूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतेनांत्यवर्णसंव
द्वेनपदव्युत्पादनसमयग्रहानुगृहीतेनश्रोत्रेंद्रियेणएकदैवसदसदनेकवर्णावगाहिनी
पदप्रतीतिर्जन्यते सहकारिसामर्थ्यात्प्रत्यभिज्ञानवत् प्रत्यभिज्ञानप्रत्यक्षंअतीतापिपू
र्ववस्यास्फुरत्येव ततःपूर्वपूर्वपदानुभवजनितसंस्कारसहकृतेनांत्यपदविषयेण
श्रोत्रेंद्रियेणपदार्थप्रत्ययानुगृहीतेनअनेकपदावगाहिनीवाक्यप्रतीतिःक्रियते त
दिदंवाक्यमाप्तपुरुषेणप्रयुक्तंसद्वृत्तनामकंप्रमाणं फलेतुअस्यवाक्यार्थज्ञानंतच्चेतद्
वृत्तनामकंप्रमाणंलोकेवेदेचसाधारणं लोकेत्वयंविशेषः यःकश्चिदेवाप्तोभवतिनस्त
र्वः अतःकिंचिदेवलौकिकंवाक्यंप्रमाणंयदाप्तकर्तृकं वेदेतुपरमाप्तश्रीमहेश्वरेण कृ
तंसर्वमेववाक्यंप्रमाणं सर्वस्यैवआप्तवाक्यत्वात् वर्णितानिचत्वारिप्रमाणानि ए
भ्योनान्यत्प्रमाणं प्रमाणस्यसतोत्रैवांतर्भावात् नन्वर्थापत्तिरपिपृथक्प्रमाणमस्ति त

द्याहि पीनोदेवदत्तोदिवानभुंक्ते इतिदृष्टश्रुतेवारात्रिभोजनंकल्पते दिवाअभुंजानस्यपिनत्वंरात्रि
भोजनमंतरेणनोपपद्यते अतःपीनत्वान्यथानुपपत्तिप्रसूतार्थापत्तिरेवरात्रिभोजनेप्रमाणं
तत्रप्रत्यक्षादिभ्योभिन्नं रात्रिभोजनस्यप्रत्यक्षाद्यविषयत्वात् तेनतारात्रिभोजस्यानुमानविष
यत्वात् तथाहि अयंदेवदत्तोरात्रौभुंक्ते दिवाभुंजानत्वेसतिपीनत्वात् यस्तुरात्रौनभुंक्तेना
सौदिवाअभुंजानत्वेसतिपीन यथादिवारात्रौअभुंजानोऽपीनः नचतथायंतस्मान्नतथेति
केवलव्यतिरेक्यनुमानेनैवरात्रिभोजनस्यप्रतीयमानत्वात् किमर्थमर्थापत्तिः कल्पनी
या नन्वभावाख्यमपिपृथक्प्रमाणंअभावग्रहणेअंगीकरणीयम् तथाहि घटानुपल
ब्धेर्घटाभावोनिश्चीयतेअनुपलब्धिश्चोपलब्धिलक्षणप्राप्तस्यभावइति अभावप्रमाणेनघटाद्यभावो
गृह्यते नैतत् यद्यत्रघटोभविष्यत्तदाभूतलमिवादृश्यतइतितर्कसहकारिणाऽनुपलं
भस्यनाधेनप्रत्यक्षेणैवाभावग्रहणात् ननु इंद्रियाणिसंबद्धार्थग्राहकानि तथाहि इंद्रि
याणिवस्तुप्रकाशकानिज्ञानकरणत्वात् आलोकवत्यद्यच्चक्षुः श्रोत्रंवस्तुप्राप्यकारिणी
बहिरिंद्रियत्वात् त्वगादिवत् त्वगादीनांवस्तुप्राप्यकारित्वमुभयवादिसिद्धमेव नचेंद्रि
याभावयोः संबंधोस्ति संयोगसमवायौहिसंबंधौनचतौतयोःस्तः द्रव्ययोरिवसंयोग

इतिनियमात् अभावस्यद्रव्यत्वाभावात् अयुतसिद्धत्वाभावान्नसमवायोपि विशेषणविशेष्य भावरूपसंबंधएवनभवति भिन्नोभयाश्रितैकत्वभावात् संबंधोहिसंबंधिभ्यांभिन्नोभव ति उभयाश्रितश्चैकश्चेति यथाभेरीदंडयोगः साहेभेरीदंडाभ्यांभिन्नस्तावेवाश्रितश्चैकश्चे ति नचायंविशेषणविशेष्यभावस्तथा तथाहि दंडपुरुषयोर्विशेषणविशेष्यभाव स्ता भ्यांननिष्पद्यते नहिदंडस्यविशेषणत्वंअर्थांतरं अपितुस्वरूपमेव अभावस्यापिविशेष णत्वात् नचभावैकस्यचित्पदार्थस्यद्रव्याद्यन्यतरस्यसंभवः तस्माद्भावस्यस्वोपर क्तबुद्धिजनकत्वंयत्स्वरूपंतदेवविशेषणत्वं नत्वर्थांतरं एवंव्याप्यव्यापकत्वकार्यका रणत्वादयोप्यूह्याः स्वप्रतिबद्धबुद्धिजनकत्वस्वरूपमेवहिव्यापकत्वसमवायादीनां कारण त्वमपिकार्यानुकूलत्वव्यतिरेकिस्वरूपत्वमेवहितत्वादीनांनत्वर्थांतरं अभाव स्यापिव्यापत्वात्कारणत्वाच्च नहिअभावेसामान्यादिसंभवः तदेवंविशेषणविशेष्यभा वोनविशेषणविशेष्याभ्यांभिन्नः नातुभयाश्रितः विशेषणेविशेषणाभावमात्रस्यसत्वात् विशेष्येविशेष्यभावमात्रस्यसत्वात् विशेषणाभावस्याभावात् नाप्येकः विशेषणंचविशेष्यंचतयोर्भावइतिहेतोरुच्यमाणोभावरूपः प्रत्येकमभि

राम १२

संबध्यते तथाचविशेषणाभावोविशेष्याभावश्चेति आपन्नं द्वावेतौ एकश्चसंबंधः तस्माद्विशे षणविशेष्यभावोनसंबंधः एवंव्याव्यापकत्वादयोपिनसंबंधाः संबंधरूपप्रयोगरूप उभयनिरूपणीयत्वेनसाधर्म्येणोपचारात् तथाच असंबद्धस्याभावस्येंद्रियेणग्रहणं नभवतीति सत्यं भावाविच्छिन्नलाघात्तेः भावंप्रकाशयदिंद्रियं ~~ग्रहणंनभवति सत्यं भा~~ वाग्रहंवप्रकाशयति नत्वभावंअभावंप्रकाशयदिंद्रियंविशेषणविशेष्यभावमुखेनेतिसिद्धांतः असंबद्धाभावग्रहणेअतिप्रसंगदोषस्तुविशेषणतयेवनिरस्तः समानेपरमते यत्रोभयोःस मोदोषः परिहारोपिवासमः नैकः पर्यनुयोक्तुंस्तादृगर्थविचारणे. इतिवर्णितानिप्र माणानिचत्वारि इदमिदानींनिरूप्यते ज्ञातादिज्ञानेज्ञातेतस्यप्रामाण्यमवधार्यपुरुषःप्र वर्त्तते कश्चित्संदेहादेवप्रवृत्तः प्रवृत्युत्तरकालंज्ञलप्राप्तिलंभे सतितस्यप्रमाण्यमवधार यतीतिवस्तुगतिः अत्रकश्चिदाह प्रागेवप्रवृत्तेःप्रमाण्यमवधार्यपुरुषःप्रवर्त्तते स्वत एवप्रमाण्यावधारणात् अस्यार्थः येनैवज्ञानंगृह्यतेतेनैवतत्प्रमाण्यमपिगृह्यते नतु ह्यज्ञानग्राहकादन्यद्ज्ञान धर्मस्यप्रामाण्यस्यग्राहकं तेनज्ञानग्राहकातिरिक्तानपेक्षित

त्वमेवसंप्रमाणस्य ज्ञानंचप्रवर्त्ते पूर्वमेवगृहीतं कथमन्यथाप्रमाण्याप्रमाण्यसंदेहो
पिस्यात् अनधिगतेधर्मिणिसंदेहानुदयात् तस्मात्प्रवृत्तेः पूर्वमेवज्ञातत्वमन्यथानुपपत्ति
रूपार्थापत्त्याज्ञानेगृहीतेज्ञानगतंप्रमाण्यमप्यर्थापत्त्यैवगृहीत्वापुरुषः प्रवर्त्तते ननुप्रत्य
क्षंज्ञानमात्रंगृह्णातेततः प्रवृत्युत्तरकालंज्ञलदर्शनेज्ञाते ज्ञानस्यप्रामाण्यमवधार्यते अत्रो
च्यते ज्ञाततान्यथानुपपत्तिरूपार्थापत्त्याज्ञानंगृह्णाते इतियदुक्तंतदेवनसूक्तमहे तया
प्रमाण्यग्रहस्तूरतएव तथाहि इदंकिलपरस्याभिमतं घटादिविषयेज्ञानेज्ञातेमया
घटोयंज्ञातइति घटस्यज्ञातत्वंप्रतिसंधीयते तेनज्ञाने ज्ञातेसति ज्ञाततानामकश्चिद्धर्मो जा
यतेइत्यनुमीयते त्वच्चज्ञानात्सर्वमज्ञातत्वात् ज्ञानेज्ञातेचज्ञातत्वात् अन्वयव्यतिरेका
भ्यांज्ञानेनजन्यतइतिअवधार्यते एवंचज्ञानजन्योसौज्ञाततानामकश्चिद्धर्मोज्ञानमंतरे
णानोपपद्यते कारणाभावेकार्यानुदयात् तेनार्थापत्त्यास्वकारणंज्ञानंज्ञाततयाआ
क्षिप्यतइति नचैतदुक्तं ज्ञानविषयतारितिकाज्ञाततायाःअभावात् ननु ज्ञा
नजनितज्ञाततायारत्वमेवहिघटादेर्ज्ञानविषयत्वं तथाहि नतावत्साक्षात्येनज्ञान

विषयता घटज्ञानयोस्तदात्मनाभ्युपगमात् तदुत्पत्त्याविषयत्वेरूपादेरपिविषयत्वाप
त्तिः रूपादेरपितस्योत्पत्तेः तेनेदमनुमीयते ज्ञानेनघटेकिंचिज्ज्ञानितंयेनघट एवतस्य
विषयोनान्यइति अतोविषयतान्यथानुपपत्त्यैवज्ञाततासिद्धिः नत्वक्षप्रमाणेन सैवं
स्वभावादेवविषयत्वोपपत्तेः अर्थज्ञानयोरीदृगेवस्वभावोयेनानयोर्विषयविषयीभावः
संबंधइतरथाअतीतानागतयोर्विषयत्वंनस्यात् ज्ञानेनतत्रज्ञाततोजननासंभवात् अ
सतिधर्मिणिधर्मजननायोगात् किंचज्ञाततायाअपिज्ञानविषयत्वात् तत्रअतिप्रसंगः
तथाचानवस्था अथज्ञाततांतरमंतरेणापिस्वभावादेवविषयत्वंज्ञाततायाः एवंचेद् घ
टादावपिकिंज्ञाततयेति अलंवाज्ञाततां तथाचतन्मात्रेणज्ञानंगृह्णते प्रमाण्यंकुतः
अथज्ञाततामात्रेणज्ञानमत्रंगृह्णते प्रमाण्यंज्ञाततादिशेषेण ज्ञाततादिशेषेणप्रमाणज्ञा
नाव्यभिचारिणाप्रमाण्यमिति कुतःएवैतत् ज्ञानग्राहकग्राह्यत्वंप्रामाण्यस्य अथके
नचिद्ज्ञाततादिशेषेणप्रमाणज्ञानाव्यभिचारिणाज्ञानप्रमाण्येसहेवगृह्यते एवंचेदप्रा
माण्येपिप्राक्त्वमिदंवक्तुं केनचिद्ज्ञाततादिशेषेणाप्रमाणज्ञानव्यभिचारिज्ञानाप्रमाण्ये

सहेवगृह्येते इतिअप्रामाण्यमपिस्वतएवगृह्यतां अथेवमप्रमाण्यंपरतएव तथाचप्रमाण्य मपिपरतएवगृह्यतां ज्ञानग्राहकादन्यतइत्यर्थः ज्ञानंहिमानसमत्यक्षेणगृह्यते प्रामाण्यंपु नरनुमानेन तथाहि जलज्ञानोनंतरंजलप्राप्तिनः प्रवृत्तिर्ह्यधाफलवत्यफलाच्च फलवतीया प्रवृत्तिः सासमर्थीतयाज्ञानस्यप्रामाण्यमनुमीयतेप्रयोगश्च विवादास्यदीभूतंजलज्ञानं माणं समर्थप्रवृत्तिजनकत्वात् यन्नप्रमाणंनतत्समर्थप्रवृत्तिजनकं यथाप्रत्यक्षाभासः इतिकेवलव्यतिरेकीअत्रफलवत्प्रवृत्तिजनकंयज्जलज्ञानंतत्प्रः तस्यप्रामाण्यंसाध्यं या थार्थ्यमित्यर्थः नतुप्रमात्वं स्मृत्याव्यभिचारापत्तेः हेतुस्तुसमर्थप्रवृत्तिजनकत्वं फल वत्प्रवृत्तिजनकत्वमितियावत् अनेनकेवलव्यतिरेक्यनुमानेनाभ्यसदृशापन्नस्यजल ज्ञानस्यप्रामाण्येबोधितेतेनदृष्टांतेनप्रवृत्तेः पूर्वमेवतज्ज्ञातीयत्वेनलिंगेनान्वयव्यति रेक्यनुमानेनान्यस्यापिज्ञानस्यानभ्यासदशापन्नस्यप्रामाण्यमनुमीयते अतःपर तएवप्रामाण्यं नज्ञानग्राहकेनेवगृह्यतइति चत्वार्येवप्रमाणानियुक्तिलेशोक्तिपूर्वकं केशवोबालबोधायययाशास्त्रमवर्णयत् इतिप्रमाणानि प्रमेयाण्युच्यंते आत्मश

रीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तुप्रमेयमितिसूत्रं तत्रात्मत्वसा मान्यद्वानात्मासच्चदेहेंद्रियादिव्यतिरिक्तः प्रतिशरीरंभिन्नः विभुर्नित्यश्च सचमानसप्रत्यक्षः विप्रतिपत्तौतुबुध्यादिगुणलिंगकः तथाहि बुद्ध्यादयस्तावद्गुणाः अनित्यत्वेसतिएकेंद्रि यमात्रग्राह्यत्वात्रूपवत्यगुणाश्चगुणाश्रितएव तत्रबुद्ध्यादयोगुणाः नभूतानांमानसप्रत्य क्षत्वात् येहिभूतानांगुणाः नतेमनसागृह्यंते यथारूपादयः नापिरिक्तालमनसांगुणाः विशेषगुणत्वात् येहिरिगादिगुणाः संख्यादयोनतेविशेषगुणाः तेहिसर्वद्रव्यसाधारणाए व बुद्ध्यादयस्तुविशेषगुणाः गुणत्वेसतिएकेंद्रियमात्रग्राह्यत्वात् रूपवत् अतोनरिगा दिगुणाः तस्मादेतेभ्योऽभ्योऽतिरिक्तोबुद्ध्यादीनांआश्रयएवव्यः सएवात्मा प्रयोग श्च बुद्ध्यादयः पृथिव्यादिषद्द्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्यादिषद्द्रव्याणामाश्रितत्वेसतिगु णत्वात् यः पृथिव्यादिषद्द्रव्यातिरिक्तद्रव्याश्रितोनभवतिनासौपृथिव्यादिषद्द्रव्याणामाश्रि तत्वेसतिगुणः यथा रूपादि इतिकेवलव्यतिरेकीअन्वयव्यतिरेकीवा तथाहि बुद्ध्याद यः पृथिव्यादिषद्द्रव्यातिरिक्तद्रव्याश्रिताः पृथिव्यादिषद्द्रव्याणामाश्रितत्वेसतिगुणत्वात्

यः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितो न भवति नासौ पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणः
यथा रूपादि इतिकेवलव्यतिरेकी अन्वयव्यतिरेकी वा तथाहि बुद्ध्यादयः पृथिव्याद्यष्टद्र
व्यातिरिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात् योयदनाश्रितो गुणः स
तदतिरिक्ताश्रितो भवति यथा पृथिव्याद्यनाश्रितः रूपः पृथिव्याद्यतिरिक्ताकाशाश्रयश्च
तदेवं पृथिव्याद्यष्टद्रव्यातिरिक्तं नवमं द्रव्यं आत्मसिद्धः सचसर्वत्रकार्योपलंभाद्विभुः प
रममहत्परिमाणवानित्यर्थः विभुत्वान्नित्यो सौव्योमवत् सुखादीनां वैशेषिकात्मतिशरी
रंमिन्नः तस्य भोगायतनमित्यावयविशरीरं द्रव्यानारंभकंकार्यद्रव्यमित्यावदति सुख
दुःखान्यतरसाक्षात्कारोभोगः सचयदवच्छिन्नेआत्मनिजायतेतदेवभोगायतनं तदेवशरी
रं चेष्टाश्रयोवा शरीरं चेष्टानुग्रहीताहितप्राप्तिपरिहारार्थक्रिया नतुशरीरसंयुक्तं ज्ञानकरण
मतींद्रियमिंद्रियं अतींद्रियमिंद्रियमित्युच्यमाने आकाशादेरिंद्रियत्वप्रसंगात् अतउक्तं
ज्ञानकरणमिंद्रियमिति तथापिरंद्रियार्थसन्निकर्षेतिप्रसंग अतउक्तं शरीरसंयुक्तमिति
शरीरसंयुक्तं ज्ञानकरणमित्युक्तेआलोकादेरिंद्रियत्वप्रसंगः अतउक्तमतींद्रियमिति ता

निचेंद्रियाणिषट् घ्राणरसनचक्षुःश्रोत्रत्वग्मनांसि तत्रगंधोपलब्धिसाधनमिंद्रियंघ्राणं त
न्नासाग्रवर्त्ति तच्चपार्थिवंगंधस्येवग्राहकत्वात् यदिंद्रियंरूपादिषुपंचसुमध्येयंगुणंगृह्णा
तितदिंद्रियंतद्गुणवत् इतियुक्तं यथाचक्षू रूपग्राहकं रूपवत् गंधग्राहकं घ्राणंअसगं
धवत् रसोपलब्धिसाधनमिंद्रियंरसनंजिह्वाग्रवर्त्ति नच्चाप्यं रूपादिषुचतुषुमध्येरस
स्येवाभिव्यंजकत्वात् लालावत् रूपोपलब्धिसाधनमिंद्रियंचक्षुः कृष्णतारात्रवर्त्ति तच्च
तेजसं रूपादिषुमध्येरूपस्येवाभिव्यंजकत्वात् आलोकवत् स्पर्शोपलब्धिसाधनमिं
द्रियंत्वक्सर्वशरीरव्यापि तच्चत्रयवीर्यं रूपादिषुपंचसुमध्येस्पर्शस्येवाभिर्व्यंजकत्वात्
अंगसंगिसलिलस्पर्शेत्याभिव्यंजकपवनवत्स्पर्शोपलब्धिसाधनमिंद्रियंश्रोत्रं तच्चकर्ण
शष्कुल्यवच्छिन्नमाकाशमेव तच्चनद्रव्यांतरं शब्दगुणत्वात् तच्चशब्दस्येवग्राहकत्वा
त् यदिंद्रियंरूपादिषुपंचसुमध्येयगुणंगृह्णातितदिंद्रियंतद्गुणवत् यथाचक्षुरादिः श
ब्दग्राहकंचश्रोत्रं अतःशब्दगुणकं सुख्यद्युपलब्धिसाधनंइंद्रियं मनःतच्चाणुपरिमाणं
ननुचक्षुरादींद्रियसद्भावेकिंप्रमाणं उच्यते अनुमानमेव रूपाद्युपलब्धयःकरणसाध्याः

क्रियात्वात् छिदिक्रियावत् अर्थाः षट्पदार्थाः तेचद्रव्यगुणकर्मसामान्यविशेषसमवा
याः यद्यपिप्रमाणादयोप्यत्रैवांतर्भवंति तथापिप्रयोजनवशाद्भेदेनसंकीर्तिताः तत्रसम
वायिकारणंद्रव्यं तानिचद्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिनवैव त
त्रपृथिवीत्वसामान्यवतीपृथिवी गंधवती काठिन्यकोमलाघवयत्नसंयोगविशेषेणयुक्ता
प्रणवादीरसृष्टिंउपादानकारणरूपा रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयो
गविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारवती साचद्विधा नित्याऽनित्याच परमाणुरूपा
नित्या कार्यरूपाऽनित्या द्विविधायाःअपिपृथिव्याः रूपरसगंधस्पर्शाअनित्याः पाकजा
श्चपाकरूपजः संयोगः तेनपृथिव्या पूर्वरूपादयोनश्यंते अन्येजन्यंतेइतिपाकजाः आ
त्मसमान्यवत्काआपः रसनेंद्रियशरीरसरित्समुद्रहिमकरकाविरूपाः गंधवर्जास्नेहयु
क्तपूर्वोक्तगुणवत्यः नित्याअनित्याश्च नित्यानांरूपादयोनित्याएव अनित्यानांरूपादयो
अनित्याएव तेजस्त्वसामान्यवत्तेजः शरीरचक्षुःसवितृवर्णवह्निविद्युदादिप्रभेदं रू
पस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वनैमित्तिकद्रवत्वसंस्कारव

त् नित्यमनित्यंचपूर्ववत् तत्रतुर्विधं उद्भूतरूपस्पर्शं अनुद्भूतरूपस्पर्शं अनुद्भूतरूपनुद्भूत
स्पर्शंउद्भूतरूपमनुद्भूतस्पर्शंचेति उद्भूतरूपस्पर्शंयथा पिंडितंतेजोवन्यादिकं सुवर्णउ
द्भूताभिभूतरूपस्पर्शं नानुद्भूतत्वेअवाक्षुषंस्यात् अनुद्भूतस्पर्शत्वेन स्पर्शोनगृह्यते अभि
भवस्तुबलवत्सजातीयपार्थिवरूपस्पर्शाभ्यांचकृतः अनुद्भूतरूपस्पर्शंतेजोयथा चक्षु
रिंद्रियं अनुद्भूतरूपमुद्भूतस्पर्शंतेजोयथातप्तवारिस्थंतेजः उद्भूतरूपमनुद्भूतस्पर्शं
तेजोयथा प्रदीपप्रभामंडलं वायुत्वाभिसंबंधवान्वायुः त्वगिंद्रियशरीरप्राणवातादि
भेदः स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्ववेगवान् सचस्पर्शानुमे
यः तथाहि योयंवायोवातिअनुष्णाशीतस्पर्शउपलभ्यते गुणत्वात् गुणिनमंतरेणा
नुपपद्यमानोगुणिनंअनुमापयति गुणीचवायुरेव पृथिव्यामनुपलब्धेःपृथिवीवा
युव्यतिरेकेणानुष्णाशीतस्पर्शाभावात् पृथिव्यांतुएकजः स्पर्शः सचद्विविधोवायुः
नित्यानित्यभेदात् नित्यः परमाणुरूपः अनित्यः कार्यरूपः अत्रपृथिव्यादीनांचतु
र्णांउत्पत्तिविनाशक्रमः कथ्यते द्व्योः परमाण्वोःक्रियायासंयोगेसतिद्व्यणुकमुत्पद्य

ते तस्य परमाणुसमवायिकारणं परमाणुसंयोगोऽसमवायिकारणं अदृष्टादिनिमित्तकारणं ततस्त्र्याणुकानामक्रियासंयोगे सतित्र्यणुकमुत्पद्यते तस्य द्व्यणुकानि समवायीकारणमवयवपूर्ववत् एवंत्र्यणुकैश्चतुरणुकं चतुरणुकैः स्थूलं स्थूलैः स्थूलतरं स्थूलतमं इत्येवंक्रमेण महापृथिवी महत्यः आपः महत्तेजांसि महान् वायुरुत्पद्यते कार्यगताः रूपादयः स्वाश्रयसमवायीकारणगतेभ्यो रूपादिभ्यो जायते कारणगुणाः कार्यगुणानारभंत इतिन्यायात् इत्थमुत्पन्नस्य रूपादिमतः कार्यद्रव्यस्य घटादेरवयवैः कपालादेर्नोदनाद्यभिघाताद्वा क्रिया जायते तया विभागः तेनावयवारंभकस्यासमवायीकारणस्य संयोगस्य नाशः क्रियते ततः कार्यद्रव्यस्यावयविनो घटादेर्नाशः एतेनासमवायीकारणनाशेन द्रव्यनाशोदर्शितः क्वचित्समवायीकारणनाशेद्रव्यनाशः पूर्वोक्तपृथिव्यादेः संहारे संज्ञिहार्वीमहेश्वरस्य संज्ञिहार्वीतोऽणुषु क्रिया जन्यते तया विभागः तस्मात्संयोगनाशो द्व्यणुकेषुनश्येद्व्याश्रयनाशाअणुकादिनाशक्रमेण पृथिव्यादिनाशः यथातंतुनाशेपटनाशः तद्गतानांरूपादीनांस्वाश्रयनाशेनैवनाशः अन्यत्रतुसत्येवाश्रयेविरोधिगुणप्रादुर्भावे

ननाशः यथापाकेनघटादेः रूपनाशइति किंपुनः परमाणुसद्भावे प्रमाणमुच्यते यदिदंजालसूर्यमरीचिस्थंरजः सर्वतः सूक्ष्मतममुपलभ्यतेतत्स्वतः स्वपरिमाणान्महत्परिमाणद्व्यारब्धं कार्यद्रव्यत्वात्घटवत् तच्चकार्यद्रव्यमेव महद्द्व्यारंभकस्यकार्यद्रव्यत्वनियमात् तदेवं द्व्यणुकाख्यंद्रव्यांतरंसिद्धं तदपिस्वल्पपरिमाणसमवायिकारणारब्धं कार्यद्रव्यत्वान्नघटवत् यस्यद्व्यणुकारंभकःसएवपरमाणुः सचनारब्धएव ननु कार्यद्रव्यारंभकस्यकार्यद्रव्यत्वाव्यभिचारात्कथमनारब्धत्वंडच्यते अनंतकार्यपरंपरादोषप्रसंगात् तथाचसतिअनंतद्रव्यारब्धत्वाविशेषेणमेरुसिद्धार्थोरपितुल्यपरिमाणत्वप्रसंगात्तस्मादनारब्धएवपरमाणुः द्व्यणुकंतुद्व्याभ्यांपरमाणुभ्यांउत्पद्यते एकस्यानारंभकत्वात् आदिकस्यनार्थाप्रमाणाभावात् त्र्यणुकंतुत्रिभिरेवद्व्यणुकैरारभ्यते एकस्यानारंभकत्वात् द्वाभ्यामारंभेकार्यगतमहत्वानुपपत्तिप्रसंगात् कार्येहिमहत्वंकारणमहत्वारणब्धत्वाद्व तत्रप्रथमस्यासंभवात् चरमन्वेषितव्यं चतुरादिकेष्वनार्थाप्रमाणाभावात् त्रिभिरेवमहत्वारंभोपपत्तेरिति शङ्कगुणमाकाश शङ्कसंख्यापरिमाणपृथक्त्वसंयोगवि

भागवत् एकंविभुनित्यंचाकृलिंगंच आकृलिंगत्वमस्यकथं परिशेषात् प्रसक्तप्रतिषेधेन्य
त्रप्रसंगात्परिशिष्यमाणेसंप्रत्ययः परिशेषः तथाहि आकृस्तावत्सामान्यवत्येसतिअस्म
दादिबाह्येकैंद्रियग्रहत्वात्विशेषगुणरूपादिवत् गुणश्चगुणकाश्रितएव नचास्य
पृथिव्यादिचतुष्टयंआत्माचागुणीभवितुमर्हति श्रोत्रग्राह्यत्वात्शब्दस्य येहिपृथि
व्यादीनांगुणाः नतेश्रोत्रेणगृह्यंते यथारूपादयः आकृस्तुश्रोत्रेणगृह्यतेतेनहिदिक्काल
मनसांगुणोविशेषगुणत्वात् अतएवभ्योऽन्यः अतिरिक्तः आकृस्यगुण्येद्रव्यैः सएवा
काशइति सचैकोभेदेनप्रमाणाभावात् एकत्वेनोपपत्तेः एकत्वाच्चाकाशत्वंसामा
न्यंआकाशेनविद्यते सामान्यस्यानेकाश्रयत्वात् विभुचाकाशः परममहत्परिमाण
वदित्यर्थः सर्वत्रकार्योपलब्धेर्विभुत्वान्नित्यमिति कालोदिग्विपरीतपरत्वापरत्वा
नुमेयः संख्यापरिमाणपृथक्त्वसंयोगविभागवत् एकोनित्योविभुश्च कथमस्यदिग्वि
परीतपरत्वापरत्वानुमेयत्वं उच्यते संनिहितेह्यसन्निधानादपरत्वार्हेविपरीतपरत्वं
प्रतीयते व्यवहितेह्यसन्निधानात्परत्वार्हेविपरीतमपरत्वंतदिदंदिग्विपरीतंपरत्व

मपरत्वंकार्यतपरत्वंचकार्यतत्कारणस्यदिगादेरसंभवात् कालमेवकारणमनुमापयति सचै
कोपिवर्त्तमानातीतभविष्यल्लिंगोपाधिवशात्वर्त्तमानादिव्यपदेशंलभते पुरुषस्यपक्ष्यादिक्रि
योपाधिवशात् पाचकपाठकादिव्यपदेशंलभते नित्यत्वविभुत्वेचास्यपूर्ववत् दिगेकानित्या
विभ्वीच संख्यापरिमाणपृथक्त्वसंयोगविभागगुणवती पूर्वादिप्रत्ययैरनुमेया तेषामस
न्यनिमित्तासंभवात् पूर्वस्मिन्यस्मिमेवादेशेस्थितस्यवस्तुनस्तादवस्थ्यात् सापेक्षापितस्म
देशोपाधिवशात्पाच्यादिसंज्ञांलभते आत्मत्वाभिसंबंधवानात्मा सुखदुःखादिवैचित्र्या
न्नानाभूतएव सचोक्तएव तस्यगुणाः संख्यादयः पंचबुध्यादयोनव नित्यविभुतेऽस्य
पूर्ववत् मनस्त्वतिसर्वेषामनः अणुसंयोगिजातरिंद्रियसुखदुःखाद्युपलब्धिकारणं नित्यं
च शब्दाद्यगुणवत् तत्संयोगेनवाक्षेंद्रियंअर्थग्राहकं अतएवतत्सर्वोपलब्धिसाधनं॥
नत्वाप्रत्यक्षं अपितुअनुमानगम्यं तथाहि सुखाद्युपलब्धयश्चक्षुरादिघातरिक्तकरण
साध्याः अस्मत्पक्षेचक्षुरादिघुज्ञायमानत्वात् छिदावत् यश्चसुखाद्युपलब्धिकरणं
तन्मनः तच्चाणुपरिमाणं अथगुणाः उच्यंते सामान्यवानसमवायिकारणंअन्यदा

त्मागुणः सच्चद्रव्याश्रितः रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्व गुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारभेदात् चतुर्विंशतिधैव तत्रचक्षुरिंद्रियग्राह्यो विशेषगुणोरूपं पृथिव्यादित्रयवर्ति तत्र शुक्लादिभेदेनैक प्रकारं पाकजंचपृथिव्यां तत्रानित्यं पृथिवीमात्रे आप्यतेजसपरिमाणेनित्यं आ प्यतेजसकार्येष्वनित्यं शुक्लंलाक्षारसयाकजंतेजसि तदेवमणाक्षारसपाकजमप्सु रसो रसनेंद्रियग्राह्यो विशेषगुणः पृथिवीजालवर्तिः पृथिव्यांमधुरादिषड्प्रकारः पाकज श्च अम्लश्चकरोऽपाकजोनित्योऽनित्यश्च नित्यः परमाणुभूतास्वप्सु कार्यभूतास्वप्सु अनित्यः गंधोघ्राणग्राह्यो विशेषगुणः पृथिवीमात्रवर्तिः सुरभिरसुरभिश्च जलादौ गंधप्रतिलंभश्चसंयुक्तसमवायेनद्रव्यः स्पर्शस्त्वगिंद्रियग्राह्यो विशेषगुणः पृथिव्या दित्रितुष्टयवर्तिः सच्चत्रिविधः शीतोष्णानुष्णाशीतभेदात् शीतः पयसि उष्णस्तेजसि अ नुष्णाशीतः पृथिवीवायोः एतेद्रव्यादयश्चत्वारोमूर्त्तवति समवेतत्वेसतिऊद्भूताः ए वंप्रत्यक्षाः संख्याएकादिव्यवहारहेतुः सामान्यगुणः एकत्वादिपरार्धपर्यंतो तत्र

एकत्वंद्विविधं नित्यानित्यभेदात् नित्यगतंनित्यं अनित्यगतंअनित्यं स्वाश्रयसमवायिकार णगतैकत्वजन्यंचद्वित्वंतन्नित्यमेवञ्चद्वयोर्विंशत्योरिदमेकमिदमेकमित्यपेक्षाबुद्ध्याज न्यते तस्यद्वेपिंडोसमवायिकारणे पिंडयोरेकत्वेऽसमवायिकारणे अपेक्षाबुद्धिर्निमि त्तकारणंअपेक्षाबुद्धिनाशात्द्वित्वादिनाशः एवंत्रित्वाद्यत्पत्तिः परिमाणं मानव्यवहारासा धारणंकारणं चतुर्विधं आणुमहदीर्घह्रस्वभेदात् तत्रकार्यगतंपरिमाणंसंख्यापरिमा णप्रचययोनि तथाहि द्व्यणुकपरिमाणमीश्वरापेक्षाबुद्धिजपरमाणुद्वित्वजनितत्वात् संख्यायोनि संख्याकरणमित्यर्थः त्र्यणुकपरिमाणंस्वाश्रयसमवायिकारणगबहुत्वसंख्यायोनि अतःकारणात्तत्संख्यायोनि संख्याकारणमित्यर्थः चतुरणुकादिप रिमाणंतु स्वाश्रयसमवायिकारणगतमहत्परिमाणजं तूलपिंजपरिमाणंतुप्रचययो नि स्वाश्रयसमवायिकारणावयवानांप्रसिथिलसंयोगजं परिमाणुपरिमाणंपरमम हत्परिमाणंचाकाशादिगतंनित्यमेव पृथक्त्वंपृथग्व्यापारासाधारणंकारणं तद्द्विवि धं एकंपृथक्त्वंद्विपृथक्त्वादिकंचेति तत्राद्यंनित्यगतंनित्यं नित्येत्यगतमनित्यं द्विपृथ

त्काद्यनित्यमेव संयोगः संयुक्तव्यवहारहेतुः द्व्याश्रयः अव्याप्यवृत्तिश्च सच्त्रिविधः अन्यतरकर्मजउभयकर्मजःसंयोगजश्चेति तत्राद्यःसंयोगो यथा क्रियावतायेनेनसहनिःक्रियस्यस्थानोसंयोगः अत्रहिश्येनक्रियाअसमवायिकारणं उभयकर्मजोयथा सक्रिययोर्मल्लयोर्मेषयोःसंयोगः संयोगजोयथा कारणकारणसंयोगात्कार्याकार्यसंयोगः यथा हस्ततरुसंयोगात्कायतरुसंयोगः विभागोविभक्तप्रत्ययहेतुः संयोगपूर्वः द्व्याश्रयःसत्रिविधः अन्यतरकर्मजाउभयकर्मजोविभागजश्चेति तत्राद्यःश्येनक्रियाया शैलश्येनविभागः द्वितीयोयथा मल्लयोर्मेषयोर्विभागः तृतीयोयथा हस्ततरुविभागात्कायतरुविभागः परत्वापरत्वेपरापरव्यवहारासाधारणेकारणे तेतुद्विविधे दिक्कृतेकालकृतेच तत्रदिक्कृतयोरुत्पत्तिः कथ्यते एकस्यांदिशिअवस्थितयोः पिंडयोरिदमस्मात्संनिकृष्टमितिअपेक्षाबुध्यानुगृहीतेनदिक्पिंडसंयोगेनापरत्वंसन्निकृष्टेजन्यते विप्रकृष्टेत्वपेक्षाबुध्यापरत्वंजन्यते सन्निकृष्टत्वंपिंडस्यदृष्टेः शरीरापेक्षायासंयुक्तसंयोगात्सीयत्वंविप्रकर्षिः कालकृतयोरुत्पत्तिःकथ्यते अनियतदिगव

एम २०

स्थितयोर्युवस्थविरयोरयमस्मादल्पतरकालेनसंबद्धइतिबुध्यानुगृहीतेनकालपिंडसंयोगनासमवायिकारणेनयुवस्थविरेपरत्वंजन्यते अमुष्माद्बहुतरकालेनसंबद्धइतिबुध्यानुगृहीतेनकालपिंडसंयोगेनस्थविरेपरत्वंजन्यते गुरुत्वमाद्यपतनासमवायिकारणं पृथिवीजलमात्रवृत्ति यथोक्तम् संयोगवेगप्रयत्नाभावेसतिगुरुत्वात्पतनमिति द्रवत्वमाद्यसंदनासमवायिकारणं भूतेजोजलवृत्ति भूतेजसोर्घृतादिसुवर्णयोरग्निसंयोगेनद्रवत्वंनैमित्तकं जलेनैसर्गिकं स्नेहश्चिक्कण जलमात्रवृत्तिः कारणगुणपूर्वकः गुरुत्वादिवत् तत्राद्यपरमाणोनित्यं अन्यत्रानित्यं यावद्द्रव्यभावि शब्दः श्रोत्रग्राह्योविशेषगुणः ननुकथमस्यश्रोत्रेणग्रहणं यतोभेर्यादिदेशेशब्दोवायते श्रोत्रंपुरुषदेशेस्थितमत्यं भेरीदेशोजातःशब्दोवीचीतरंगन्यायेनकदंबमुकुलन्यायेनवासन्निहितंशब्दांतरमारभते सचशब्दः शब्दांतरमितिक्रमेणश्रोत्रदेशेजातोंत्यःशब्दः श्रोत्रेणगृह्यते नत्वयोनापिमध्यमः एवंवंशोपाध्यमानेदलद्द्रव्यविभागदेशेमातःशब्दःशब्दांतरारंभक्रमेणश्रोत्रदेशेअंत्यं शब्दं जनयति सोंत्यःशब्दःश्रोत्रेणगृह्यते नाद्योनमध्यमः भेरीशब्देनयासमुत्तर

तिधीरत्रभ्रांता एव वीचीतरंगक्रमेणाऽरब्धत्वात् भेरीशष्कुल्योर्भेर्याकाशसंयोगोऽसम
वायीकारणं भेरीदंडसंयोगोनिमित्तकारणं आकाशंचसमवायिकारणं एवंवंशाद्यारब्धोत्प
न्नचटचटाशब्दोत्पत्तौदलद्वयाकाशादिविभागोऽसमवायिकारणं दलद्वयविभागोनिमित्तका
रणं इत्यमाद्यःशब्दःसंयोगजोविभागजोवा अंत्यमध्यमशब्दानांतुशब्दोऽसमवायिका
रणं अनुकूलोवातोनिमित्तकारणं यथोक्तम् संयोगद्विभागाद्यःशब्दस्यशब्दनिष्पत्तिरि
ति आद्यादीनांसर्वशब्दानामाकाशमेवैकंसमवायिकारणं शब्दकर्मबुद्धीनांत्रिक्षणावस्था
यित्वं आद्यमध्यमशब्दाः कार्यशब्दानाश्याः अंत्यस्तूपांत्येनऽपांत्यस्त्वंत्येनैव ऽपांसुंदो
पसुंदन्यायेन नश्यसिपरं स्वमुक्तं ऽपांत्येनक्षणावस्थायिनाअंत्यस्यद्वितीयक्षणानुगामि
नातृतीयक्षणेचऽसताअंत्यशब्दनाशजननासंभवात् तस्मादुपांत्यनाशादेवांत्यनाश
ति विनाशित्वंचशब्दस्यानुमानात् शब्दोऽनित्यः सामान्यवत्येसति अस्मादादिबाह्येंद्रि
यग्राह्यत्वात् शब्दस्यानित्यत्वंसाध्यं अनित्यत्वंचविनाशाबच्छिन्नसरूपत्वं नतुविनाश
बच्छिन्नसत्तायोगः प्रागभावेसत्ताहीनेऽनित्यत्वाभावप्रसंगात् सामान्यवत्येसतिअ

स्मदादिबाह्येंद्रियग्राह्यत्वंहेतुः इंद्रियग्राह्यत्वादित्युक्तेऽात्मनिव्यभिचारः स्यात् अतोक्तं
बाह्येतिएवमपियोगिबाह्येंद्रियग्राह्यपरिमाणादेरव्यभिचारः स्यात् अतोयोगिनिरासा
र्थंअस्मदादति किंपुनर्योगिसद्भावेममाणं उच्यते परमाणवः कस्यचित्प्रत्यक्षाःप्रमे
यत्वात् घटवत् तथासामान्यादिनाव्यभिचारःऽअतउक्तंसामान्यवत्येसति सामान्यादित्रयं
तुनिःसामान्यं अर्थप्रकाशोबुद्धिः प्रीतिःसुखंतच्चसर्वात्मनाअनुकूलंवेदनीयं पीडादुःखं
तच्चसर्वात्मनांप्रतिकूलंवेदनीयं रागइच्छा क्रोधोद्वेषः उत्साहःप्रयत्नः बुद्ध्यादयः स
ट्मानसप्रत्यक्षाः सुखदुःखयोरसाधारणेकारणेधर्माधर्मौ तौचाप्रत्यक्षावप्यनुमा
नगम्यौ तथाहि देवदत्तस्यशरीरादिकं देवदत्तस्यविशेषगुणजन्यं कार्यत्वेसतिदेवदत्त
भोगहेतुत्वात् देवदत्तप्रयत्नजन्यवस्तुवदिति यच्चशरीरादिजनकआत्मविशेषगुणसए
वधर्मोधर्मश्चेति प्रयत्नादीनांतुशरीराद्यजनकत्वात् संस्कारस्त्रिविधः वेगोभावनास्थि
तिस्थापकश्च स्पर्शादिचतुष्टयमनोवृत्तिः क्रियाहेतुः भावनाख्यस्तुसंस्कारआ
त्मवृत्तिरनुभवजन्यः स्मृतिबीजस्यबोधकः स्थितिःस्थापकश्चस्पर्शादिचतुष्टयविशेषवृत्तिः

अन्यथाभूतस्यधनुरादेः स्वाश्रयस्यपुनस्तस्यैवस्थापकः स्थितिस्थापकः एतेचबुद्ध्या
दयोधर्माधर्मौताभावनाच्चात्मविशेषगुणाः गुणाःउक्ताः कर्माण्युच्यंते चलनात्मकंक
र्म गुणवत् द्रव्यमात्रवृत्ति अविभुद्रव्यपरिमाणेनमूर्त्तत्वायरनाम्नासहैकार्यसमवेतै
विभागद्वारापूर्वसंयोगनाशोसतिउत्तरसंयोगहेतुश्च उक्षेपणापक्षेपणाकुंचनप्रसार
णगमनभेदात्पंचैव भ्रमणादयस्तुगमनेनैवगृह्यंते अनुवृत्तिप्रत्ययहेतुः सामान्यं
द्रव्यादिश्रयवृत्ति नित्यमेकमनेकानुगतंच तच्चद्विविधं परमपरंच परंसत्ताबहुवि
षयत्वात् नच्चानुवृत्तिमात्रहेतुत्वात्सामान्यमात्रं अपरंद्रव्यत्वादि अल्पविषयत्वात्
तच्चव्यावृत्तेरपिहेतुत्वात्सामान्यंविशेषः अत्रकश्चिदाह व्यक्तिव्यतिरिक्तंसामान्यंना
स्तीति अत्रब्रूमः किमालंबनातर्हिभिन्नेषुविलक्षणेषुपिंडेषुएकाकाराबुद्धिर्विनास
वीनुगतमेकं किंचिद्धर्मं यन्नतदालंबनंतदेवसामान्यमिति ननु अतद्व्यावृत्तिरूपैवैका
काराबुद्धिरस्तु तथाहि सर्वेपिंडेषुगोपिंडेषुअगोव्यावृत्तिरूपमेवं विधिमुखेने
काकारग्रहणात् विशेषोनित्यः नित्यद्रव्यवृत्तिः व्यावृत्तिहेतुः नित्यद्रव्याणिआ

रम २९

काशादीनिपंचपृथिव्यादयश्चत्वारः परमाणुरूपाः अयुतसिद्धयोः संबंधसमवायः सचोक्त
एव ननुअवयवावयविनावप्ययुतसिद्धौ तेनतयोः संबंधः समवायइतिनैचेतद्युक्तम् अवयव
व्यतिरिक्तस्यावयविनोऽभावात् परमाणवएवबहवस्तथासंन्निकृष्टा घटोयंघटोयमितिबु
द्ध्यारुह्यंते अत्रोच्यते अस्त्येकः स्थूलोघटइतिप्रत्यक्षाबुद्धिः नचसापरमाणुषुअनेकेषुअ
स्थूलेषुअतींद्रियेषुभ्रांतिर्बुद्धिरितिचेन्नबाधकाभावात्तदेवंषड्विधार्थ
द्रव्यादयोदर्शिताः तेचविधिमुखेप्रत्ययवेद्यत्वाद्भावरूपाएव इदानींनिषेधमुखप्रत्ययगम्यो
अभावरूपः सप्तमःपदार्थःप्रतिपाद्यते सचाभावः संक्षेपतोद्विविध संसर्गाभावोऽन्योन्याभा
वश्चेति संसर्गाभावोपित्रिविधः प्रागभावः प्रध्वंसाभावो अत्यंताभावश्चेति उत्पत्तेः प्राक्कार
णेकार्यस्याभावः प्रागभावः यथातंतुषुपटाभावः सचानादिरुत्पत्तेरभावात्विनाशीच का
र्यस्येदतद्विनाशरूपत्वात् उत्पन्नस्यकार्यस्यकारणेअभावः प्रध्वंसाभावोविनाशइतियाव
त् यथाभ्रेघटेकपालमालायांघटाभावः सचमुद्गरादिप्रहाराज्जन्यः सचोत्पत्तिमानपिअ
विनाशी पुनरनिवृत्तेः कार्यस्य त्रैकालिकोऽभावोऽत्यंताभावः।।यद्घटायोरूपाभावः अ

न्योन्याभावस्तादात्म्यप्रतियोगिकोभावः यथाघटोपटोनभवतीति तदेवंअर्थाव्याख्याताः॥
ननुज्ञानात्ब्रह्मणोवाव्यतिरिक्ताअर्थानसंति मैव अर्थानामपिप्रत्यक्षसिद्धत्वेनअशक्यापलापत्वात् बुद्धिरुपलब्धिर्ज्ञानं प्रत्ययश्चेत्यादिपर्यायशब्दैर्यदभिधीयतेसाबुद्धिः अर्थप्रकाशोबुद्धिः सान्द्विविधा अनुभवः स्मृतिश्च अनुभवोपिद्विविधः यथार्थोअयथार्थश्चेति तत्रयथार्थोअविसंवादि सच्चप्रत्यक्षादिप्रमाणैर्जन्यते यथाचक्षुरादिभिरदुष्टैर्घटादिज्ञानंजन्यते धूमादिलिंगज्ञानाद्वह्निज्ञानं गोसादृश्यादर्शनानंतरंगवयशब्दवाच्यताज्ञाना ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादिवाक्यात्ज्योतिष्टोमस्यस्वर्गसाधनत्वज्ञानं अयथार्थस्तूभयभिचारीअप्रमाणजः सत्त्रिविधः संशयस्तत्कोविपर्ययश्चेतिसंशयतत्कोवक्ष्येते विपर्ययस्तूअतस्मिंस्तद्ग्रहणं भ्रमइतियावत् यथापुरोवर्त्तिनिअरजतेशुक्त्यादेरजतरूपग्रहः इदंरजतमिति स्मरणमपियथार्थमयथार्थंचेति तद्द्वयंजागरे स्वप्नेतुसर्वज्ञानंस्मरणमेव अयथार्थंच दोषवशात्तद्रितिस्थानेइदमित्युदयात् सर्वंचज्ञानंस्मरणमेव अयथार्थंच दोषवशात्तद्रितिस्थानेइदमित्युदयात् सर्वंचज्ञानंनिरुपकारमेव ननुज्ञानेनअर्थेस्वस्था

ज्ञाना
कारोजन्यते तन्न साकारज्ञानवादिनिराकरणात् अतेएवकारेणार्थानुमानमपिनिरस्तं प्रत्यक्षसिद्धत्वात्घटादेः सर्वंज्ञानंअर्थनिरूप्यं अर्थमतिवद्रूपेवतस्यमनस्तन्निरूपणात् घटज्ञानवानहंरतिरत्येतावन्मात्रंजन्यते अंतरिंद्रियंमनस्तच्चोक्तमेव प्रवृत्तिर्धर्माधर्ममयी यागादिक्रिया तस्याः प्रवृत्तेर्जगत्व्यवहारसाधकत्वात् दोषाः रागद्वेषमोहाः रागइच्छा द्वेषोमत्सरः क्रोधइतियावत् मोहोमिथ्याज्ञानं विपर्ययइतियावत् पुनरुत्पत्तिः प्रेत्यभावः फलंसुखंदुःखं तदुभोगः पीडादुःखंतत्रोक्तमेवापवर्गोऽपवर्गः सचैकविंशतिभेदभिन्नस्दुःखस्यात्यंतिकीनिवृत्तिः एकविंशतिभेदस्तुशरीरंषडिंद्रियाणिषड्विषयाः षड्बुद्धयः सुखंदुःखंचेति गौणमुख्यभेदात्सुखंदुःखमेव दुःखानुषंगित्वात् अनुषंगोअविनाभावः सचायमुपचारः मधुनिविषसंसक्तेमधुनोपिविषयशब्दनिक्षेपवत् सोपवर्गःकथं उच्यते शास्त्रादितपदार्थतत्त्वविषयदोषदर्शनेनविरक्तस्यमुमुक्षोर्ध्यानविशेषाभ्यासपरिपाकवशात्साक्षात्कृतात्मनः क्लेशहीनस्यनिः कामकर्मानुष्ठानात्अनागतधर्माधर्मोत्पत्तिर्जायतः पूर्वोपपन्नधर्मप्रपंचंयोगप्रभावात्विरित्वासमाहृत्यभुंजानस्यपूर्वकर्मनिवृत्तौवर्त्तमानशरीरापगमे

अपूर्वशरीराभावात् एकविंशतिदुःखसंबंधोनभवतिकारणाभावात् सोयं एकविंशतिप्रभेददुःखहानिर्मोक्षः अयमेवापवर्ग इदानीं संशयमाह एकस्मिन्धर्मिणिविरुद्धनानार्थविमर्शः संशयः सत्रिविधः एकोविशेषादर्शनेसतिसमानधर्मदर्शनजोविप्रतिपत्तिजोऽसाधारणधर्मजश्चेति तत्रसमानधर्मदर्शनजोयथा स्थाणुर्वापुरुषोवेतिएकस्मिन्नेवहि पुरोवर्त्तिनिद्व्येस्थाणुत्वनिश्चयायकंवक्रकोटरादिकंपुरुषत्वनिश्चयायकंशिरःपाण्यादिकंविशेषमपश्यतः स्थाणुपुरुषयोःसमानधर्मभूतादिलक्षणंचपश्यतः पुरुषस्यभवति संशयः किमयं स्थाणुः स्यात् पुमान्वेति द्वितीयस्तु संशयोविशेषादर्शनेसतिविप्रतिपत्तिजः किमयं शब्दोनित्यउतानित्यइति तथाहि एकोब्रूतेशब्दोनित्यइतिअपरोब्रूतेशब्दोनित्यइतितयोर्विप्रतिपत्त्यामध्यस्थस्यपुंसोविशेषमपश्यतोभवतिसंशयः।किमसर्वज्ञत्वंचक्षुरादीनां चतुर्थोयथा जैमिनीयस्यशास्त्रविचारेनित्यानित्यविचारेभवतुतावच्छब्दोगुणइति अनुमानवाक्येकदेशावयवाः तेचप्रतिज्ञादयः तथाचन्यायसूत्रं प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाइति तत्रसाध्यधर्मविशिष्टधर्मिप्रतिपादकंवचनंप्रतिज्ञा यथापर्वतोग्निमा

राम २४

निति पंचम्यंततृतीयांतवालिंगप्रतिपादकंवचनंहेतुः यथाधूमवत्वादिति सव्याप्तिकंदृष्टांतवचनमुदाहरणम् योयोधूमवान्ससोग्निमान्यथामहानसइति पक्षेलिंगोपसंहारउपनयः यथाअयंधूमवान्इति पक्षेसाध्योपसंहारोनिगमनम् यथातस्मादग्निमानितितस्मात्तथेतिएतेप्रतिज्ञादयः पंचानुमानवाक्यस्यावयवाइवावयवाः ननुसमवायिकारणंगुणस्याकाशासमवेतत्वात् तत्कोनिरूपसंगः सत्यसिद्धव्याप्तिकयोर्धर्म्मयोर्व्याप्यांगीकारेव्यापकप्रसंजनम् यथायदिघटोभविष्यत्।।तदाभूतलमिवादृश्यात् सचायंतर्कः प्रमाणानुग्राहकः तथाहि अयंपर्वतःसाग्निकतानिरग्निरितिसंदेहानंतरंयदिकस्मिन्नग्नेतानग्नेरयमितितंत्रप्रतियद्यमनग्निरभविष्यन्अनग्नित्वादधूमोपिभविष्यदितिअधूमत्वस्यप्रसंजनंक्रीयतेसएवप्रसंगःउच्यते।।अयंचसाध्यरूपोधर्मःसवर्त्तमानस्यतर्कस्यविषयःअनग्निमत्वस्यप्रतिक्षेपात्अतोनुमानस्यभवत्यनुग्राहकइति अत्रकश्चिदाह।।तर्कःसंशयेऽंतर्भवति तत्र एककोटिविषयत्वात् निर्णयोऽवधारणज्ञानं तत्रप्रमाणफलं तत्वबुभुत्सोःकथावादःसवादनिग्रहाणांअधिकरणम् तेचन्यूनाधिकापसिद्धां

तहेत्वाभासपंचकंचेत्यादेर्निग्रहाः उभयपक्षसाधनवतीविजिगीषुकथाजल्पः सचयथासं
भवंसर्वनिग्रहाणामधिकरणम् परपक्षेदूषितेस्वपक्षस्यनमर्थवसानञ्च स्वपक्षस्यापन
हीनावितंडा परपक्षदूषणमात्रावसाना नास्त्येवैतंडिकस्यस्वाप्यः पक्षोस्ति कथानानाव
तीकदर्वीत्तरपक्षप्रतिपादकवाक्यसंदर्भः उक्तानांपक्षधर्मतादिरूपाणांमध्येएकेनापिरू
पेणहिनाअहेतवः तेचकतिपयरूपयोगाद्धेतुवदवभासमानोहेत्वाभासाः तेचासिद्धविरुद्ध
नैकांतिकैरणसमकालात्ययापदिष्टभेदात्पंचैव अत्रोदयनेन व्याप्तस्यपक्षधर्मतयाप्रती
तिःसिद्धिः तदभावोऽसिद्धिः इत्यसिद्धलक्षणमुक्तम् तत्रविरुद्धादिष्वपिसंभवतीतिसां
कर्यंप्रतीयते तथापियथानसांकर्य्यंतथोच्यते योहियत्रसाधने पुरतः स्फुरतिससमर्थो दुष्टस्तसोसएवदुष्टत्वसन्निकारणं दूषणमितियावत् नान्यःतेनैवपरिस्फूर्त्तिकेनदुष्टोज्ञो
ज्ञापितायांकर्षंपर्यवसानेज्ञातेऽन्यस्यानुपयोगात् व्यामोहतथाचसतिविरोधोविपर्ययब्या
प्तोतथाचसतियत्रविरोधेविपर्ययवरात्यादुष्टज्ञापनिकारकःसविरुद्धोहेत्वाभासः एव्यभिचा
रिभिवस्तथाभूतास्तेऽनेकांतिकादयः येपुनर्व्याप्तिपक्षधर्मताविशिष्टहेतुस्वरूपरूप्य

रूप २५

भावेनदूर्वोक्तास्तेऽसिद्धादुष्टज्ञापनिकारकारतियावत् तथाचभूतःसोसिद्धस्त्रिविधः आश्रयासि
द्धस्वरूपासिद्धव्याप्यत्वासिद्धभेदात् तत्राश्रयस्यहेतोराश्रयेनावगम्यतेसआश्रयासिद्धः यथा
गगनारविंदंसुरभिअरविंदत्वात्सरोजारविंदवत् अत्रहिगगनारविंदमाश्रयःसतुनास्त्येव अ
यमपिआश्रयासिद्धः तथाहि घटोऽनित्यःकार्यत्वात्पटवत् ननुआश्रयस्यसत्वात्का
र्यत्वादितिहेतुर्नाश्रयसिद्धः सिद्धसाधनंतुस्यात् सिद्धस्यघटानित्यत्वस्यसाधनात् मैवं
नहिस्वरूपेणकश्चिदाश्रयोभवतिअनुमानस्य किंतुसंदिग्धत्वेन गानुपलब्धेननिर्णीतेर्येन्या
यः अवश्यंतेऽपितुसंदिग्धे नचघटेऽनित्यत्वस्यसंदेहोस्ति अनित्यत्वस्यनिश्चितत्वात्
तेनयद्यपिस्वरूपेणघटोविद्यतेतथापिआनित्यत्वसंदेहाभावात् नासावाश्रयइति आ
श्रयासिद्धत्वादहेतुः स्वरूपासिद्धस्तुसउच्यते योहेतुआश्रयेनावगम्यते यथासामा
न्यमनित्यंकृतकत्वादिति कृतकत्वंहेतुः सचाश्रयेसामान्येनास्ति भागासिद्धोपिस्वरूपा
सिद्धएव यथापृथिव्यादयश्चत्वारःपरमाणवःअनित्याःगंधवत्त्वात् गंधवत्त्वंहिहेतुः प
क्षीकृतेषुसर्वेषुनास्ति पृथिवीमात्रवृत्तित्वात् अतएवभागेस्वरूपासिद्धत्वं तथाविधो

षणसिद्धविशेष्यासिद्धासमर्थविशेषणसिद्धासमर्थविशेष्यासिद्धद्वयःस्वरूपासिद्धभेदाः त
त्रविशेषणसिद्धोयथा शब्दोनित्योद्रव्यत्वेसतिअस्पर्शवत्वात् अत्रद्रव्यत्वविशिष्टमस्पर्श
वत्त्वंहेतुःनास्पर्शवत्त्वमात्रं अस्पर्शवत्त्वमात्रंविद्यते द्रव्यत्वंचनास्तिगुणत्वात्अतोविशेष
णासिद्धः नचास्तिविशेषणेद्रव्यत्वेतद्विशिष्टंअस्पर्शवत्वमस्तिविशेषणाभावेविशिष्टस्या
भावात् यथादंडमात्राभावेपुरुषरूपमात्राभावेवादंडपुरुषस्याभावः तेनसत्यपिअस्प
र्शवत्वेविशिष्टस्यहेतोरभावात् स्वरूपासिद्धत्वं विशेष्यासिद्धत्वंयथा शब्दोनित्यःअस्पर्शत्वे
सतिद्रव्यत्वात्इति अत्रापिविशिष्टोहेतुः नचविशेष्याभावेविशिष्टस्वरूपमस्ति विशिष्टस्य
हेतुर्नास्त्येव असमर्थविशेषणसिद्धोयथा शब्दोनित्यः गुणत्वेसतिअकारणत्वात् आ
ष्यपरमाणुरूपवदिति अत्रविशेषणस्यगुणत्ववत्स्य नकिंचित्सामर्थ्यमस्तिअतोऽसमर्थविशे
षणताविशेष्यस्यआकारणत्वस्यैवनित्यत्वसाधनेसामर्थ्यात् अतोऽसमर्थविशेषणं स्व
रूपासिद्धस्तुविशेषणाभावेविशिष्टस्याभावात् ननुविशेषणगुणत्वं तत्रशब्देस्त्येव तत्क
थंविशेषणाभावः सत्यं अस्त्येवगुणत्वंकिंतुनतद्विशेषणंगुणत्वम् तदेवहिहेतावि

सत्सप्रतिपक्षो ४

शेषणंभवति यदन्यव्यवच्छेदेनप्रयोजनवत् गुणत्वंतुनिःप्रयोजनं अतोऽसमर्थमित्युक्तम् अ
समर्थविशेष्यासिद्धोयथा तत्रैवतदत्यत्वेनप्रयोगेशब्दोनित्यःअकारणत्वेसतिगुणत्वादिति अ
त्रविशेषणस्यैवनित्यत्वसाधनेसामर्थ्यात्इति विशेष्यमसमर्थम् स्वरूपासिद्धस्तुविशेष्याभा
वेपिविशिष्टाभावात् विशिष्टस्यहेतुत्वेनोपादानात् दोषंपूर्ववत् व्याप्यत्वासिद्धस्तुसएवयस्य
हेतोर्व्याप्तिर्नावगम्यते सद्विविधः एकःसाध्येनासहचरितः अपरस्तूपाधिकसाध्यसंबंधः
तत्रप्रथमोयथा यत्सत्तत्क्षणिकंसत्वंहेतुः नचैकयोर्व्याप्तिग्राहकंकिंचित्प्रमाणमस्ति इदानीं
व्याप्यत्वासिद्धोसंप्रदर्श्यते सश्यामोमैत्रीतनयः मैत्रीतनयत्वात् परिदृश्यमानमैत्रीतनय
वत् अत्रमैत्रीतनयत्वेनहेतुनाश्यामत्वंसाध्यते नचमैत्रीतनयत्वंश्यामत्वेप्रयोजकं किंतुशा
काद्यन्नपरिणामएवप्रयोजकः प्रयोजकश्चोपाधिरितियावत् अतोमैत्रीतनयत्वस्यश्यामत्वेन
सहसंबंधेशाकाद्यन्नपरिणामएवउपाधिः यथाग्नेर्धूमसंबंधेआर्द्रेंधनसंयोगः अत्रोपाधिसंबं
धाद्व्याप्तिर्नास्तीति व्याप्यत्वासिद्धोयंमैत्रीतनयत्वादितिहेतुः अपरोपिव्याप्यत्वासिद्ध क
लंतरवर्त्तिनीहिंसाअधर्मसाधनं हिंसात्वात् क्रतुवाद्यहिंसावत् नचहिंसात्वंअधर्मप्रयोज

कं किंतुनिषिद्धत्वमुपाधिरितिपूर्ववत् उपाधिसद्भावात् व्याप्यत्वासिद्धोयंहिंसात्वंहेतुः ननु सा
धनाव्यापकत्वेसतिसाध्याव्यापकोयः सउपाधिःइत्युपाधिलक्षणं तन्निषिद्धत्वेनास्ति तत्कथं
निषिद्धत्वमुपाधिरितिचेत् मैवं निषिद्धत्वेपिलक्षणस्यविद्यमानत्वात् तथाहि साध्यस्याध
र्मत्वस्यव्यापकंनिषिद्धत्वं यत्रयत्राधर्मसाधनत्वंतत्रतत्रावश्यंनिषिद्धत्वस्यविद्यमानत्वात् न
चयत्रयत्रहिंसात्वंतत्रतत्रावश्यंनिषिद्धत्वम् ऋत्वंगहिंसायांव्यभिचारात् अत्रहिऋत्वंगहिंसा
त्वमस्तिनत्वनिषिद्धत्वम् अतोहिऋत्वंगहिंसायाःअनिषिद्धत्वमितिहेतोः तस्माद्हिंसात्वादि
तिहेतुरुपाधिसद्भावात्व्याप्यत्वासिद्धः तदेवंत्रिविधोऽसिद्धोवर्णितः संप्रतिविरुद्धः क
थ्यते साध्यविपर्ययव्याप्यत्वंविरुद्धः यथाशब्दोनित्यःकृतकत्वादितिअत्रहिनित्यत्वं
साध्यंतद्विपर्ययेणानित्यत्वेनकृतकत्वंव्याप्तम् यद्यत्कृतकंतत्तदनित्यमेव अतः साध्यवि
पर्ययव्याप्यत्वात्कृतकत्वंहेतुर्विरुद्धः साध्यसंशयहेतुरनैकांतिकः सव्यभिचारइतिवोच्य
ते सद्विविधः साधारणानैकांतिकोऽसाधरणानैकांतिकश्चेति तत्र प्रथमापक्षसपक्षविपक्ष
वृत्ति यथाशब्दोनित्यःप्रमेयत्वादिति अत्रप्रमेयत्वंहेतुरः पक्षशब्दे सपक्षेनित्येगगनादौ

विपक्षेचानित्येघटादौविद्यमानत्वादिति सर्वस्यप्रमेयत्वादिति तस्मात्प्रमेयत्वादितिहेतुः साधारणा
नैकांतिकः असाधारणानैकांतिकः सएव यः सपक्षविपक्षाभ्यांव्यावृत्तः पक्षेएववर्ततेयथाभूर्नित्या
गंधवत्त्वात् अत्रहिगंधवत्त्वंहेतुः सपक्षान्नित्यात्व्योमादेर्विपक्षान्नानित्याज्जलादेर्व्यावर्तगंधव
त्त्वस्यपृथिवीमात्रवृत्तित्वादिति व्यभिचारस्तुलक्ष्यते नियमासंभवात् पक्षसपक्षवृत्तिहेतोः
सपक्षएवसतिविपक्षात्व्यावृत्तिरेवनियमोगमकत्वात् अस्यचसाध्यविप रीतव्याप्त
स्येवतन्नियमाभावः व्यभिचारः सचद्विविधःसंभवति सपक्षविपक्षयोर्वृत्तोताभ्यांव्यावृत्तोच
यस्यप्रतिपक्षभूतंहेत्वंतरंविद्यतेसमकरणसमः सएवसत्प्रतिपक्षउच्यते तद्यथाशब्दोनित्यः
नित्यधर्मानुपलब्धेः शब्दोनित्यःअनित्यधर्मानुपलब्धेः अत्रहिपरीतार्थसाधकंसमानब
लमनुमानांतरंसत्प्रतिपक्षइत्युच्यते यत्पुनरतुल्यबलंनतत्प्रतिपक्षः तद्यथाहि विपरीत
अर्थसाधकंसमानबलमनुमानंत्रिविधं [illegible]
अहिविषरी उपजीव्यनुपजीवकमनुभयंचेति तत्राधबधकंबलवत्त्वात् यथापरमाणुःअ
नित्यःमूर्तत्वात् घटवत् अस्यहेतोःपरमाणुसाधकानुमानंनित्यत्वंसाधयद्विनप्रतिप

क्षः किंतुबाधकमेव उपजीव्यत्वात् तत्प्रधर्मिग्राहकत्वात्बलवत् नहिप्रमाणेनाग्राह्यमाणेधर्मि
णिपरमण्वादौअनित्यत्वानुमानमिदंसंभवति अयसिद्धेःअणुपरिमाणेतारतम्यंक्वचिद्विश्रांतंप
रिमाणतारतम्यात्वात् महत्परिमाणतारतम्यवत् अतोअनेनानुमानेनपरिमाणुग्राह्यग्राह्यमाप्य
मनुज्ञातंअन्यथास्योरयसंभवात् तस्माद्उपजीव्यंबाधकमेव उपजीवकंतुदुर्बलत्वाद्बाध्यं यथेद्
मेवानित्यत्वानुमानं तृतीयंप्रतिपक्षः समबलत्वात् यस्यप्रतिपक्षादिप्रमाणेनपक्षेसाध्याभा
वःपरिछिन्नः सकलात्ययापरिष्टः यथाघटस्यक्षणिकत्वेसाध्येग्राह्यकत्वंहेतुः तस्यापिय
त्साध्यंक्षणिकत्वं तस्याभावोअक्षणिकत्वंप्रत्यभिज्ञालक्षणप्रत्यक्षेणपरिछिन्नं सएवायंघ
टोमयापूर्वमुपलब्धइतिप्रत्यभिज्ञयापूर्वानुभवजनितसंस्कारसहकृतेंद्रियप्रभवयापूर्वापर
कालाकलितयाघटस्यस्थायित्वंपरिछिद्यते एतेचसिद्धादयः एवंहेत्वाभासायथाकथंचित्प
क्षधर्मत्वादिरूपहीनत्वाद्हेतवः स्वसाध्यंनसाधयंतियेपिलक्षणस्यकेवलव्यतिरेकिहेतोस्त्र
योरोषाःअव्याप्तिअतिव्याप्तिसंभवास्तेपिअत्रैवअंतर्भवंति नतुपंचम्योधिकाः तथाहि अ
तिव्याप्तिर्व्याप्यत्वासिद्धः विपक्षाद्व्यावृत्तिअभावात् सोपाधिकत्वात्र व्याप्यत्वासिद्धः यथा

राम २८

गोलक्षणस्यपशुत्वस्य गोत्वेहिसत्वादिकंप्रयोकं नपशुत्वं तथाव्याप्तेर्भागासिद्धत्वम् यथागोलक्षण
स्य शाबलेयत्वस्य एवमसंभवोपिस्वरूपासिद्धः यथागोलक्षणस्यएकशफत्वस्येति अभिप्रायांत
रेणप्रयुक्तस्यचाकूस्यार्थांतरंपरिकल्प्यदूषणाभिधानंछलं यथानवकंबलोयंदेवदत्तइतिवाक्येन
तनाभिप्रायेणप्रयुक्तस्यनवत्वाकूस्यार्थांतरंमशक्यकल्पितूषयति नास्यनवकंबलाःसंतिदरिद्रत्वा
त् नहिअस्यद्रिद्रत्वमपिसंभाव्यते कुतोनवेति सचवाग्छलवादितया वक्त्राभिप्रायाभिज्ञतया जी
यते असदुत्तरंजातिः साचोत्कर्षसमादिभेदेनबहुधाविस्तरभयान्नेहकात्स्न्यनोच्यते तत्रव्याप्ते
रदृष्टांतस्तत्तधर्मेणपक्षेअव्यापकधर्मस्याप्यादानमुत्कर्षसमानजाति यथाशब्दोअनित्यः कृ
तकत्वात् इत्युक्तेकश्चिदेवमाह यदिकृतकत्वेनहेतुनाघटवत्शब्दोअनित्यः स्यात्तर्हितेनैवहे
तुनातद्वदेवशब्दः सावयवोपिस्यात् अपकर्षसमातुदृष्टांतगतेनधर्मेणव्याप्तेनाव्यापकध
र्मीभावस्यापादानं यथापूर्वस्मिन्नयोगेकश्चिदेवमाह यदिकृतकत्वेनहेतुनाघटवत्शब्दोअ
नित्यस्यात्तर्हितेनहेतुनाघटवदेवशब्दः अभावोपिस्यात्नहिघटआवणइति पराजयहेतु
र्निग्रहस्थानं न्यूनाधिकापसिद्धांतार्थांतराप्रतिभाननुज्ञाविरोधादिभेदाद्बहुविधमपिवि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

स्तरभयान्नेह कृत्स्न्येच्यते यद्दिङ्मात्रतार्थीलिंचित्स्तूनंतन्न्यूनं विवक्षितात्किंचिदधिकमधिकम्
सिद्धांतादपध्वंसोयसिद्धांतः प्रकृतेनासंबद्धार्थवचनंअर्थांतरम् उक्तार्थपरिस्फुटनंपुनरुक्तिभा।प
रामिमतस्यार्थस्यस्वमतिकौशल्यस्वयमेवाभ्युत्तानं स्वीकरणंमतानुज्ञा इष्टार्थभंगोविरोधः
इहात्यंतमुपयुक्तानांस्वरूपभेदेभूयोभूयः प्रतिपादनंअनभिप्रयोजनानांचालक्षणमदोषाय
एतावतैवबलव्युत्पत्तिसिद्धेः॥इतिश्रीकेशवमिश्रविरचितातर्कभाषासमाप्तः॥शुभमस्तु॥श्रीराम॥

राम
२९